Utpaladevavirachita Shivastotravali

# ઉત્પલદેવવિરચિતા શિવસ્તોત્રાવલિઃ

## Document Information

Text title : ShivastotravalI by Utapaladeva

File name : shivastotrAvalIutapaladeva.itx

Category : shiva, kAshmIrashaivadarshanam

Location : doc_shiva

Author : Utpaladeva

Transliterated by : Somadeva Vasudeva

Proofread by : Somadeva Vasudeva

Description-comments : 20 stotras for Shiva by Utpaladeva

Acknowledge-Permission: GRETIL, sanskritworld.in

Latest update : February 14, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 14, 2024

*sanskritdocuments.org*

# ઉત્પલદેવવિરચિતા શિવસ્તોત્રાવલિઃ

## અનુક્રમણિકા


૧. ભક્તિવિલાસાખ્યં પ્રથમં સ્તોત્રમ્ ।
૨. સર્વાત્મપરિભાવનાખ્યં દ્વિતીયં સ્તોત્રમ્ ।
૩. પ્રણયપ્રસાદાખ્યં તૃતીયં સ્તોત્રમ્ ।
૪. સુરસોદ્બલાખ્યં ચતુર્થં સ્તોત્રમ્ ।
૫. સ્વબલનિદેશનાખ્યં પઞ્ચમં સ્તોત્રમ્ ।
૬. અધ્વવિસ્ફુરણાખ્યં ષષ્ઠં સ્તોત્રમ્ ।
૭. વિધુરવિજયનામધેયં સપ્તમં સ્તોત્રમ્ ।
૮. અલૌકિકોદ્બલનાખ્યમષ્ટમં સ્તોત્રમ્ ।
૯. સ્વાતન્ત્ર્યવિજયાખ્યં નવમં સ્તોત્રમ્ ।
૧૦. અવિચ્છેદભઙ્ગાખ્યં દશમં સ્તોત્રમ્ ।
૧૧. ઔત્સુક્યવિશ્વસિતનામૈકાદશં સ્તોત્રમ્ ।
૧૨. રહસ્યનિર્દેશનામ દ્વાદશં સ્તોત્રમ્ ।
૧૩. સઙ્ગ્રહસ્તોત્રનામ ત્રયોદશં સ્તોત્રમ્ ।
૧૪. જયસ્તોત્રનામ ચતુર્દશં સ્તોત્રમ્ ।
૧૫. ભક્તિસ્તોત્રનામ પઞ્ચદશં સ્તોત્રમ્ ।
૧૬. પાશાનુદ્ભેદનામ ષોડશં સ્તોત્રમ્ ।
૧૭. દિવ્યક્રીડાબહુમાનનામ સપ્તદશં સ્તોત્રમ્ ।
૧૮. આવિષ્કારનામ અષ્ટાદશં સ્તોત્રમ્ ।
૧૯. ઉદ્યોતનાભિધાનમેકોનવિંશં સ્તોત્રમ્ ।
૨૦. ચર્વણાભિધાનં વિંશં સ્તોત્રમ્ ।


અથ શિવસ્તોત્રાવલિઃ ॥

ૐ તત્સત્ ।

શ્રી વિઘ્નહર્ત્રે નમઃ ।

શ્રીગુરવે શિવાય નમઃ ।

## ભક્તિવિલાસાખ્યં પ્રથમં સ્તોત્રમ્ ।

ન ધ્યાયતો ન જપતઃ સ્યાદ્યસ્યાવિધિપૂર્વકમ્ ।
એવમેવ શિવભાસસ્તં નુમો ભક્તિશાલિનમ્ ॥ ૧.૧॥

આત્મા મમ ભવદ્ભક્તિસુધાપાનયુવાપિ સન્ ।
લોકયાત્રારજોરાગાત્પલિતૈરિવ ધૂસરઃ ॥ ૧.૨॥

લબ્ધતત્સમ્પદાં ભક્તિમતાં ત્વત્પુરવાસિનામ્ ।
સઞ્ચારો લોકમાર્ગેઽપિ સ્યાત્તયૈવ વિજૃમ્ભયા ॥ ૧.૩॥

સાક્ષાદ્ભવન્મયે નાથ સર્વસ્મિન્ ભુવનાન્તરે ।
કિં ન ભક્તિમતાં ક્ષેત્રં મન્ત્રઃ ક્વૈષાં ન સિદ્ધ્યતિ ॥ ૧.૪॥

જયન્તિ ભક્તિપીયૂષરસાસવવરોન્મદાઃ ।
અદ્વિતીયા અપિ સદા ત્વદ્વિતીયા અપિ પ્રભો ॥ ૧.૫॥

અનન્તાનન્દસિન્ધોસ્તે નાથ તત્ત્વં વિદન્તિ તે ।
તાદૃશા એવ યે સાન્દ્રભક્ત્યાનન્દરસાપ્લુતાઃ ॥ ૧.૬॥

ત્વમેવાત્મેશ સર્વસ્ય સર્વશ્ચાત્મનિ રાગવાન્ ।
ઇતિ સ્વભાવસિદ્ધાંસ્ત્વદ્ભક્તિં જાનઞ્જયેજ્જનઃ ॥ ૧.૭॥

નાથ વેદ્યક્ષયે કેન ન દૃશ્યોઽસ્યેકકઃ સ્થિતઃ ।
વેદ્યવેદકસઙ્ક્ષોભેઽપ્યસિ ભક્તૈઃ સુદર્શનઃ ॥ ૧.૮॥

અનન્તાનન્દસરસી દેવી પ્રિયતમા યથા ।
અવિયુક્તાસ્તિ તે તદ્વદેકા ત્વદ્ભક્તિરસ્તુ મે ॥ ૧.૯॥

સર્વ એવ ભવલ્લાભહેતુર્ભક્તિમતાં વિભો ।
સંવિન્માર્ગોઽયમાહ્લાદદુઃખમોહૈસ્ત્રિધા સ્થિતઃ ॥ ૧.૧૦॥

ભવદ્ભક્ત્યમૃતાસ્વાદાદ્બોધસ્ય સ્યાત્પરાપિ યા ।
દશા સા માં પ્રતિ સ્વામિન્નાસવસ્યેવ શુક્તતા ॥ ૧.૧૧॥

ભવદ્ભક્તિમહાવિદ્યા યેષામભ્યાસમાગતા ।
વિદ્યાવિદ્યોભયસ્યાપિ તા એતે તત્ત્વવેદિનઃ ॥ ૧.૧૨॥

આમુલાદ્વાગ્લતા સેયં ક્રમવિસ્ફારશાલિની ।
ત્વદ્ભક્તિસુધયા સિક્તા તદ્રસાઢ્યફલાસ્તુ મે ॥ ૧.૧૩॥

શિવો ભૂત્વા યજેતેતિ ભક્તો ભૂત્વેતિ કથ્યતે ।
ત્વમેવ હિ વપુઃ સારં ભક્તૈરદ્વયશોધિતમ્ ॥ ૧.૧૪॥

ભક્તાનાં ભવદદ્વૈતસિદ્ધ્યૈ કા નોપપત્તયઃ ।
તદસિદ્ધ્યૈ નિકૃષ્ટાનાં કાનિ નાવરણાનિ વા ॥ ૧.૧૫॥

કદાચિત્ક્વાપિ લભ્યોઽસિ યોગેનેતીશ વઞ્ચના ।
અન્યથા સર્વકક્ષ્યાસુ ભાસિ ભક્તિમતાં કથમ્ ॥ ૧.૧૬॥

પ્રત્યાહારાદ્યસંસ્પૃષ્ટો વિશેષોઽસ્તિ મહાનયમ્ ।
યોગિભ્યો ભક્તિભાજાં યદ્વ્યુત્થાનેઽપિ સમાહિતાઃ ॥ ૧.૧૭॥

ન યોગો ન તપો નાર્ચાક્રમઃ કોઽપિ પ્રનીયતે ।
અમાયે શિવમાર્ગેઽસ્મિન્ ભક્તિરેકા પ્રશસ્યતે ॥ ૧.૧૮॥

સર્વતો વિલસદ્ભક્તિતેજોધ્વસ્તાવૃતેર્મમ ।
પ્રત્યક્ષસર્વભાવસ્ય ચિન્તાનામપિ નશ્યતુ ॥ ૧.૧૯॥

શિવ ઇત્યેકશબ્દસ્ય જિહ્વાગ્રે તિષ્ઠતઃ સદા ।
સમસ્તવિષયાસ્વાદો ભક્તેષ્વેવાસ્તિ કોઽપ્યહો ॥ ૧.૨૦॥

શાન્તકલ્લોલશીતાચ્છસ્વાદુભક્તિસુધામ્બુધૌ ।
અલૌકિકરસાસ્વાદે સુસ્થૈઃ કોઽનામ ગણ્યતે ॥ ૧.૨૧॥

સાદૃશૈઃ કિં ન ચર્વ્યેત ભવદ્ભક્તિમહૌષધિઃ ।
તાદૃશી ભગવન્ યસ્યા મોક્ષાખ્યોઽનન્તરો રસઃ ॥ ૧.૨૨॥

તા એવ પરમર્થ્યન્તે સમ્પદઃ સદ્ભિરીશ યાઃ ।
ત્વદ્ભક્તિરસસમ્ભોગવિસ્રમ્ભપરિપોષિકાઃ ॥ ૧.૨૩॥

ભવદ્ભક્તિસુધાસારસ્તૈઃ કિમપ્યુપલક્ષિતઃ ।
યે ન રાગાદિ પઙ્કેઽસ્મિંલ્લિપ્યન્તે પતિતા અપિ ॥ ૧.૨૪॥

અણિમાદિષુ મોક્ષાન્તેષ્વઙ્ગેષ્વેવ ફલાભિધા ।
ભવદ્ભક્તેર્વિપક્વાયા લતાયા ઇવ કેષુ ચિત્ ॥ ૧.૨૫॥

ચિત્રં નિસર્ગતો નાથ દુઃખબીજમિદં મનઃ ।
ત્વદ્ભક્તિરસસંસિક્તં નિઃશ્રેયસમહાફલમ્ ॥ ૧.૨૬॥

## સર્વાત્મપરિભાવનાખ્યં દ્વિતીયં સ્તોત્રમ્ ।

અગ્નીષોમરવિબ્રહ્મવિષ્ણુસ્થાવરજઙ્ગમ ।
સ્વરૂપ બહુરૂપાય નમઃ સંવિન્મયાય તે ॥ ૨.૧॥

વિશ્વેન્ધનમહાક્ષારાનુલેપશુચિવર્ચસે ।
મહાનલાય ભવતે વિશ્વૈકહવિષે નમઃ ॥ ૨.૨॥

પરમામૃતસાન્દ્રાય શીતલાય શિવાગ્નયે ।
કસ્મૈ ચિદ્વિશ્વસમ્પ્લોષવિષમાય નમોઽસ્તુ તે ॥ ૨.૩॥

મહાદેવાય રુદ્રાય શઙ્કરાય શિવાય તે ।
મહેશ્વરાયાપિ નમઃ કસ્મૈ ચિન્મન્ત્રમૂર્તયે ॥ ૨.૪॥

નમો નિકૃત્તનિઃશોષત્રૈલોક્યવિગલદ્વસા-
વસેકવિષમાયાપિ મઙ્ગલાય શિવાગ્નયે ॥ ૨.૫॥

સમસ્તલક્ષનાયોગ એવ યસ્યોપલક્ષણમ્ ।
તસ્મૈ નમોઽસ્તુ દેવાય કસ્મૈ ચિદપિ શમ્ભવે ॥ ૨.૬॥

વેદાગમવિરુદ્ધાય વેદાગમવિધાયિને ।
વેદાગમસતત્ત્વાય ગુહ્યાય સ્વામિને નમઃ ॥ ૨.૭॥

સંસારૈકનિમિત્તાય સંસારૈકવિરોધિને ।
નમઃ સંસારરૂપાય નિઃસંસારાય શમ્ભવે ॥ ૨.૮॥

મૂલાય મધ્યાયાગ્રાય મૂલમધ્યાગ્રમૂર્તયે ।
ક્ષીનાગ્રમધ્યમૂલાય નમઃ પૂર્ણાય શમ્ભવે ॥ ૨.૯॥

નમઃ સુકૃતસમ્ભરવિપાકઃ સકૃદપ્યસૌ ।
યસ્ય નામગ્રહસ્તસ્મૈ દુર્લભાય શિવાય તે ॥ ૨.૧૦॥

નમશ્ચરાચરાકારપરેતનિચયૈઃ સદા ।
ક્રીડતે તુભ્યમેકસ્મૈ ચિન્મયાય કપાલિને ॥ ૨.૧૧॥

માયાવિને વિશુદ્ધાય ગુહ્યાય પ્રકટાત્મને ।
સૂક્ષ્માય વિશ્વરૂપાય નમશ્ચિત્રાય શમ્ભવે ॥ ૨.૧૨॥

બ્રહ્મેન્દ્રવિષ્ણુનિર્વ્યૂઢજગત્સંહારકેલયે ।
આશ્ચર્યકરણીયાય નમસ્તે સર્વશક્તયે ॥ ૨.૧૩॥

તટેષ્વેવ પરિભ્રાન્તૈઃ લબ્ધાસ્તાસ્તા વિભૂતયઃ ।
યસ્ય તસ્મૈ નમસ્તુભ્યમગાધહરસિન્ધવે ॥ ૨.૧૪॥

માયામયજગત્સાન્દ્રપઙ્કમધ્યાધિવાસિને ।
અલેપાય નમઃ શમ્ભુશતપત્રાય શોભિને ॥ ૨.૧૫॥

મઙ્ગલાય પવિત્રાય નિધયે ભૂષણાત્મને ।
પ્રિયાય પરમાર્થાય સર્વોત્કૃષ્ટાય તે નમઃ ॥ ૨.૧૬॥

નમઃ સતતબદ્ધાય નિત્યનિર્મુક્તિભાગિને ।
બન્ધમોક્ષવિહીનાય કસ્મૈ ચિ દપિ શમ્ભવે ॥ ૨.૧૭॥

ઉપહાસૈકસારેઽસ્મિન્નેતાવતિ જગત્ત્રયે ।
તુભ્યમેવાદ્વિતીયાય નમો નિત્યસુખાસિને ॥ ૨.૧૮॥

દક્ષિણાચારસારાય વામાચારાભિલાષિણે ।
સર્વાચારાય શર્વાય નિરાચારાય તે નમઃ ॥ ૨.૧૯॥

યથા તથાપિ યઃ પૂજ્યો યત્ર તત્રાપિ યોઽર્ચિતઃ ।
યોઽપિ વા સોઽપિ વા યોઽસૌ દેવસ્તસ્મૈ નમોઽસ્તુ તે ॥ ૨.૨૦॥

મુમુક્ષુજનસેવ્યાય સર્વસન્તાપહારિણે ।
નમો વિતતલાવણ્યવરાય વરદાય તે ॥ ૨.૨૧॥

સદા નિરન્તરાનન્દરસનિર્ભરિતાખિલ-
ત્રિલોકાય નમસ્તુભ્યં સ્વામિને નિત્યપર્વણે ॥ ૨.૨૨॥

સુખપ્રધાનસંવેદ્યસમ્ભોગૈર્ભજતે ચ યત્ ।
ત્વામેવ તસ્મૈ ઘોરાય શક્તિવૃન્દાય તે નમઃ ॥ ૨.૨૩॥

મુનીનામપ્યવિજ્ઞેયં ભક્તિસમ્બન્ધચેષ્ટિતાઃ ।
આલિઙ્ગન્ત્યપિ યં તસ્મૈ કસ્મૈ ચિદ્ભવતે નમઃ ॥ ૨.૨૪॥

પરમામૃતકોશાય પરમામૃતરાશયે ।
સર્વપારમ્યપારમ્યપ્રાપ્યાય ભવતે નમઃ ॥ ૨.૨૫॥

મહામન્ત્રમયં નૌમિ રૂપં તે સ્વચ્છશીતલમ્ ।
અપૂર્વમોદસુભગં પરામૃતરસોલ્વણમ્ ॥ ૨.૨૬॥

સ્વાતન્ત્ર્યામૃતપૂર્ણત્વદૈક્યખ્યાતિમહાપટે ।
ચિત્રં નાસ્ત્યેવ યત્રેશ તન્નૌમિ તવ શાસનમ્ ॥ ૨.૨૭॥

સર્વાશઙ્કાસનિં સર્વાલક્ષ્મીકાલાનલં તથા ।
સર્વામઙ્ગલ્યકલ્પાન્તં માર્ગં માહેશ્વરં નુમઃ ॥ ૨.૨૮॥

જય દેવ નમો નમોઽસ્તુ તે સકલં વિશ્વમિદં તવાશ્રિતમ્ ।
જગતાં પરમેશ્વરો ભવાન્ પરમેકઃ શરણાગતોઽસ્મિ તે ॥ ૨.૨૯॥

## પ્રણયપ્રસાદાખ્યં તૃતીયં સ્તોત્રમ્ ।

સદસત્ત્વેન ભાવાનાં યુક્તા યા દ્વિતયી ગતિઃ ।
તામુલ્લઙ્ઘ્ય તૃતીયસ્મૈ નમશ્ચિત્રાય શમ્ભવે ॥ ૩.૧॥

આસુરર્ષિજનાદસ્મિન્નસ્વતન્ત્રે જગત્ત્રયે ।
સ્વતન્ત્રાસ્તે સ્વતન્ત્રસ્ય યે તવૈવાનુજીવિનઃ ॥ ૩.૨॥

અશેષવિશ્વખચિતભવદ્વપુરનુસ્મૃતિઃ ।
યેષાં ભવરુજામેકં ભેષજં તે સુખાસિનઃ ॥ ૩.૩॥

સિતાતપત્રં યસ્યેન્દુઃ સ્વપ્રભાપરિપૂરિતઃ ।
ચામરં સ્વર્ધુનીસ્રોતઃ સ એકઃ પરમેશ્વરઃ ॥ ૩.૪॥

પ્રકાશાં શીતલામેકાં શુદ્ધાં શશિકલામિવ ।
દૃશં વિતર મે નાથ કામપ્યમૃતવાહિનીમ્ ॥ ૩.૫॥

ત્વચ્ચિદાનન્દજલધેશ્ચ્યુતાઃ સંવિત્તિવિપ્રુષઃ ।
ઇમાઃ કથં મે ભગવન્નામૃતાસ્વાદસુન્દરાઃ ॥ ૩.૬॥

ત્વયિ રાગરસે નાથ ન મગ્નં હૃદયં પ્રભો ।
યેષામહૃદયા એવ તેઽવજ્ઞાસ્પદમીદૃશાઃ ॥ ૩.૭॥

પ્રભુણા ભવતા યસ્ય જાતં હૃદયમેલનમ્ ।
પ્રાભવીણાં વિભૂતીનાં પરમેકઃ સ ભાજનમ્ ॥ ૩.૮॥

હર્ષાણામથ શોકાનાં સર્વેષાં પ્લાવકઃ સમમ્ ।
ભવદ્ધ્યાનામૃતાપૂરો નિમ્નાણિમ્નભુવામિવ ॥ ૩.૯॥

કેવ ન સ્યાદ્દૃશા તેષાં સુખસમ્ભારનિર્ભરા ।
યેષામાત્માધિકેનેશ ન ક્વાપિ વિરહસ્ત્વયા ॥ ૩.૧૦॥

ગર્જામિ બત નૃત્યામિ પૂર્ણા મમ મનોરથાઃ ।
સ્વામી મમૈષ ઘટિતો યત્ત્વમત્યન્તરોચનઃ ॥ ૩.૧૧॥

નાન્યદ્વેદ્યં ક્રિયા યત્ર નાન્યો યોગો વિદા ચ યત્ ।
જ્ઞાનં સ્યાત્કિં તુ વિશ્વૈકપૂર્ણા ચિત્ત્વં વિજૃમ્ભતે ॥ ૩.૧૨॥

દુર્જયાનામનન્તાનાં દુઃખાનાં સહસૈવ તે ।
હસ્તાત્પલાયિતા યેષાં વાચિ શશ્વચ્છિવધ્વનિઃ ॥ ૩.૧૩॥

ઉત્તમઃ પુરુષોઽન્યોઽસ્તિ યુષ્મચ્છેષવિશેષિતઃ ।
ત્વં મહાપુરુષસ્ત્વેકો નિઃશેષપુરુષાશ્રયઃ ॥ ૩.૧૪॥

જયન્તિ તે જગદ્વન્દ્યા દાસાસ્તે જગતાં વિભો ।
સંસારાર્ણવ એવૈષ યેષાં ક્રીડામહાસરઃ ॥ ૩.૧૫॥

આસતાં તાવદન્યાનિ દૈન્યાનીહ ભવજ્જુષામ્ ।
ત્વમેવ પ્રકટીભૂયા ઇત્યનેનૈવ લજ્જ્યતે ॥ ૩.૧૬॥

મત્પરં નાસ્તિ તત્રાપિ જાપકોઽસ્મિ તદૈક્યતઃ ।
તત્ત્વેન જપ ઇત્યક્ષમાલયા દિશસિ ક્વચિત્ ॥ ૩.૧૭॥

સતોઽવશ્યં પરમસત્સચ્ચ તસ્માત્પરં પ્રભો ।
ત્વં ચાસતઃ સતશ્ચાન્યસ્તેનાસિ સદસન્મયઃ ॥ ૩.૧૮॥

સહસ્રસૂર્યકિરણાધિકશુદ્ધપ્રકાશવાન્ ।
અપિ ત્વં સર્વભુવનવ્યાપકોઽપિ ન દૃશ્યસે ॥ ૩.૧૯॥

જડે જગતિ ચિદ્રૂપઃ કિલ વેદ્યેઽપિ વેદકઃ ।
વિભુર્મિતે ચ યેનાસિ તેન સર્વોત્તમો ભવાન્ ॥ ૩.૨૦॥

અલમાક્રન્દિતૈરન્યૈરિયદેવ પુરઃ પ્રભોઃ ।
તીવ્રં વિરૌમિ યન્નાથ મુહ્યામ્યેવં વિદન્નપિ ॥ ૩.૨૧॥

## સુરસોદ્બલાખ્યં ચતુર્થં સ્તોત્રમ્ ।

ચપલમસિ યદપિ માનસ તત્રાપિ શ્લાઘ્યસે યતો ભજસે ।

શરણાનામપિ શરણં ત્રિભુવનગુરુમમ્બિકાકાન્તમ્ ॥ ૪.૧॥

ઉલ્લઙ્ઘ્ય વિવિધદૈવતસોપાનક્રમમુપેય શિવચરણાન્ ।
આશ્રિત્યાપ્યધરતરાં ભૂમિં નાદ્યાપિ ચિત્રમુજ્ઝામિ ॥ ૪.૨॥

પ્રકટય નિજમધ્વાનં સ્થગયતરામખિલલોકચરિતાનિ ।
યાવદ્ભવામિ ભગવંસ્તવ સપદિ સદોદિતો દાસઃ ॥ ૪.૩॥

શિવ શિવ શમ્ભો શઙ્કર શરણાગતવત્સલાશુ કુરુ કરુણામ્ ।
તવ ચરણકમલયુગલસ્મરણપરસ્ય હિ સમ્પદોઽદૂરે ॥ ૪.૪॥

તાવકાઙ્ઘ્રિકમલાસનલીના યે યથારુચિ જગદ્રચયન્તિ ।
તે વિરિઞ્ચિમધિકારમલેનાલિપ્તમસ્વવશમીશ હસન્તિ ॥ ૪.૫॥

ત્વત્પ્રકાશવપુષો ન વિભિન્નં કિં ચન પ્રભવતિ પ્રતિભાતુમ્ ।
તત્સદૈવ ભગવન્ પરિલબ્ધોઽસીશ્વર પ્રકૃતિતોઽપિ વિદૂરઃ ॥ ૪.૬॥

પાદપઙ્કજરસં તવ કે ચિદ્ભેદપર્યુષિતવૃત્તિમુપેતાઃ ।
કે ચનાપિ રસયન્તિ તુ સદ્યો ભાતમક્ષતવપુર્દ્વયશૂન્યમ્ ॥ ૪.૭॥

નાથ વિદ્યુદિવ ભાતિ વિભાતે યા કદા ચન મમામૃતદિગ્ધા ।
સા યદિ સ્થિરતરૈવ ભવેત્તત્પૂજિતોઽસિ વિધિવત્કિમુતાન્યત્ ॥ ૪.૮॥

સર્વમસ્યપરમસ્તિ ન કિં ચિદ્વસ્ત્વવસ્તુ યદિ વેતિ મહત્યા ।
પ્રજ્ઞાય વ્યવસિતોઽત્ર યથૈવ ત્વં તથૈવ ભવ સુપ્રકટો મે ॥ ૪.૯॥

સ્વેચ્છયૈવ ભગવન્નિજમાર્ગે કારિતઃ પદમહં પ્રભુનૈવ ।
તત્કથં જનવદેવ ચરામિ ત્વત્પદોચિતમવૈમિ ન કિં ચિત્ ॥ ૪.૧૦॥

કોઽપિ દેવ હૃદિ તેષુ તાવકો જૃમ્ભતે સુભગભાવ ઉત્તમઃ ।
ત્વત્કથામ્બુદનિનાદચાતકા યેન તેઽપિ સુભગીકૃતાશ્ચિરમ્ ॥ ૪.૧૧॥

ત્વજ્જુષાં ત્વયિ કયાપિ લીલયા રાગ એષ પરિપોષમાગતઃ ।
યદ્વિયોગભુવિ સઙ્કથા તથા સંસ્મૃતિઃ ફલતિ સઙ્ગમોત્સવમ્ ॥ ૪.૧૨॥

યો વિચિત્રરસસેકવર્ધિતઃ શઙ્કરેતિ શતશોઽપ્યુદીરિતઃ ।
શબ્દ આવિશતિ તિર્યગાશયેષ્વપ્યયં નવનવપ્રયોજનઃ ॥ ૪.૧૩॥

તે જયન્તિ મુખમણ્ડલે ભ્રમન્નસ્તિ યેષુ નિયતં શિવધ્વનિઃ ।
યઃ શશીવ પ્રસૃતોઽમૃતાશયાત્સ્વાદુ સંસ્રવતિ ચામૃતં પરમ્ ॥ ૪.૧૪॥

પરિસમાપ્તમિવોગ્રમિદં જગદ્વિગલિતોઽવિરલો મનસો મલઃ ।
તદપિ નાસ્તિ ભવત્પુરાર્ગલકવાટવિઘટ્ટનમણ્વ પિ ॥ ૪.૧૫॥

સતતફુલ્લભવન્મુખપઙ્કજોદરવિલોકનલાલસચેતસઃ ।
કિમપિ તત્કુરુ નાથ મનાગિવ સ્ફુરસિ યેન મમાભિમુખસ્થિતિઃ ॥ ૪.૧૬॥

ત્વદવિભેદમતેરપરં નુ કિં સુખમિહાસ્તિ વિભૂતિરથાપરા ।
તદિહ તાવકદાસજનસ્ય કિં કુપથમેતિ મનઃ પરિહૃત્ય તામ્ ॥ ૪.૧૭॥

ક્ષણમપીહ ન તાવકદાસતાં પ્રતિ ભવેયમહં કિલ ભાજનમ્ ।
ભવદભેદરસાસવમાદરાદવિરતં રસયેયમહં ન ચેત્ ॥ ૪.૧૮॥

ન કિલ પશ્યતિ સત્યમયં જનસ્તવ વપુર્દ્વયદૃષ્ટિમલીમસઃ ।
તદપિ સર્વવિદાશ્રિતવત્સલઃ કિમિદમારટિતં ન શ‍ૃણોષિ મે ॥ ૪.૧૯॥

સ્મરસિ નાથ કદાચિદપીહિતં વિષયસૌખ્યમથાપિ મયાર્થિતમ્ ।
સતતમેવ ભવદ્વપુરીક્ષણામૃતમભીષ્ટમલં મમ દેહિ તત્ ॥ ૪.૨૦॥

કિલ યદૈવ શિવાધ્વનિ તાવકે કૃતપદોઽસ્મિ મહેશ તવેચ્છયા ।
શુભશતાન્યુદિતાનિ તદૈવ મે કિમપરં મૃગયે ભવતઃ પ્રભો ॥ ૪.૨૧॥

યત્ર સોઽસ્તમયમેતિ વિવસ્વાંશ્ચન્દ્રમઃ પ્રભૃતિભિઃ સહ સર્વૈઃ ।
કાપિ સા વિજયતે શિવરાત્રિઃ સ્વપ્રભાપ્રસરભાસ્વરરૂપા ॥ ૪.૨૨॥

અપ્યુપાર્જિતમહં ત્રિષુ લોકેષ્વધિપત્યમમરેશ્વર મન્યે ।
નીરસં તદખિલં ભવદઙ્ઘ્રિસ્પર્શનામૃતરસેન વિહીનમ્ ॥ ૪.૨૩॥

બત નાથ દૃઢોઽયમાત્મબન્ધો ભવદખ્યાતિમયસ્ત્વયૈવ કૢપ્તઃ ।
યદયં પ્રથમાનમેવ મે ત્વામવધીર્ય શ્લથતે ન લેશતોઽપિ ॥ ૪.૨૪॥

મહતામમરેશ પૂજ્યમાનોઽપ્યનિશં તિષ્ઠસિ પૂજકૈકરૂપઃ ।
બહિરન્તરપીહ દૃશ્યમાનઃ સ્ફુરસિ દ્રષ્ટૃશરીર એવ શશ્વત્ ॥ ૪.૨૫॥

## સ્વબલનિદેશનાખ્યં પઞ્ચમં સ્તોત્રમ્ ।

ત્વત્પાદપદ્મસમ્પર્કમાત્રસમ્ભોગસઙ્ગિનમ્ ।
ગલેપાદિકયા નાથ માં સ્વવેશ્મ પ્રવેશય ॥ ૫.૧॥

ભવત્પાદામ્બુજરજોરાજિરઞ્જિતમૂર્ધજઃ ।

અપારરભસારબ્ધનર્તનઃ સ્યામહં કદા ॥ ૫.૨॥

ત્વદેકનાથો ભગવન્નિયદેવાર્થયે સદા ।
ત્વદન્તર્વસતિર્મૂકો ભવેયં માન્યથા બુધઃ ॥ ૫.૩॥

અહો સુધાનિધે સ્વામિન્નહો મૃષ્ટ ત્રિલોચન ।
અહો સ્વાદો વિરૂપક્ષેત્યેવ નૃત્યેયમારટન્ ॥ ૫.૪॥

ત્વત્પાદપદ્મસંસ્પર્શપરિમીલિતલોચનઃ ।
વિજૃમ્ભેયભવદ્ભક્તિમદિરામદઘૂર્ણિતઃ ॥ ૫.૫॥

ચિત્તભૂભૃદ્ભુવિ વિભો વસેયં ક્વાપિ યત્ર સા ।
નિરન્તરત્વત્પ્રલાપમયી વૃત્તિર્મહારસા ॥ ૫.૬॥

યત્ર દેવીસમેતસ્ત્વમાસૌધાદા ચ ગોપુરાત્ ।
બહુરૂપઃ સ્થિતસ્તસ્મિન્ વાસ્તવ્યઃ સ્યામહં પુરે ॥ ૫.૭॥

સમુલ્લસન્તુ ભગવન્ ભવદ્ભાનુમરીચયઃ ।
વિકસત્વેષ યાવન્મે હૃત્પદ્મઃ પૂજનાય તે ॥ ૫.૮॥

પ્રસીદ ભગવન્ યેન ત્વત્પદે પતિતં સદા ।
મનો મે તત્તદાસ્વાદ્ય ક્ષીવેદિવ ગલેદિવ ॥ ૫.૯॥

પ્રહર્ષાદ્વાથ શોકાદ્વા યદિ કુડ્યાદ્ઘટાદપિ ।
બાહ્યાદથાન્તરાદ્ભાવાત્પ્રકટીભવ મે પ્રભો ॥ ૫.૧૦॥

બહિરપ્યન્તરપિ તત્સ્યન્દમાનં સદાસ્તુ મે ।
ભવત્પાદામ્બુજસ્પર્શામૃતમત્યન્તશીતલમ્ ॥ ૫.૧૧॥

ત્વત્પાદસંસ્પર્શસુધાસરસોઽન્તર્નિમજ્જનમ્ ।
કોઽપ્યેષ સર્વસમ્ભોગલઙ્ઘી ભોગોઽસ્તુ મે સદા ॥ ૫.૧૨॥

નિવેદિતમુપાદત્સ્વ રાગાદિ ભગવન્મયા ।
આદાય ચામૃતીકૃત્ય ભુઙ્ક્ષ્વ ભક્તજનૈઃ સમમ્ ॥ ૫.૧૩॥

અશેષભુવનાહારનિત્યતૃપ્તઃ સુખાસનમ્ ।
સ્વામિન્ ગૃહાણ દાસેષુ પ્રસાદાલોકનક્ષણમ્ ॥ ૫.૧૪॥

અન્તર્ભક્તિચમત્કારચર્વણામીલિતેક્ષણઃ ।
નમો મહ્યં શિવાયેતિ પૂજયં સ્યાં તૃણાન્યપિ ॥ ૫.૧૫॥

અપિ લબ્ધભવદ્ભાવઃ સ્વાત્મોલ્લાસમયં જગત્ ।
પશ્યન્ ભક્તિરસાભોગૈર્ભવેયમવિયોજિતઃ ॥ ૫.૧૬॥

આકામ્ક્ષણીયમપરં યેન નાથ ન વિદ્યતે ।
તવ તેનાદ્વિતીયસ્ય યુક્તં યત્પરિપૂર્ણતા ॥ ૫.૧૭॥

હસ્યતે નૃત્યતે યત્ર રાગદ્વેષાદિ ભુજ્યતે ।
પીયતે ભક્તિપીયૂષરસસ્તત્પ્રાપ્નુયાં પદમ્ ॥ ૫.૧૮॥

તત્તદપૂર્વામોદત્વચ્ચિન્તાકુસુમવાસના દૃઢતામ્ ।
એતુ મમ મનસિ યાવન્નશ્યતુ દુર્વાસનાગન્ધઃ ॥ ૫.૧૯॥

ક્વ નુ રાગાદિષુ રાગઃ ક્વ ચ હરચરણામ્બુજેષુ રાગિત્વમ્ ।
ઇત્થં વિરોધરસિકં બોધય હિતમમર મે હૃદયમ્ ॥ ૫.૨૦॥

વિચરન્ યોગદશાસ્વપિ વિષયવ્યાવૃત્તિવર્તમાનોઽપિ ।
ત્વચ્ચિન્તામદિરામદતરલીકૃતહૃદય એવ સ્યામ્ ॥ ૫.૨૧॥

વાચિ મનોમતિષુ તથા શરીરચેષ્ટાસુ કરણરચિતાસુ ।
સર્વત્ર સર્વદા મે પુરઃસરો ભવતુ ભક્તિરસઃ ॥ ૫.૨૨॥

શિવશિવશિવેતિ નામનિ તવ નિરવધિ નાથ જપ્યમાનેઽસ્મિન્ ।
આસ્વાદયન્ ભવેયં કમપિ મહારસમપુનરુક્તમ્ ॥ ૫.૨૩॥

સ્ફુરદનન્તચિદાત્મકવિષ્ટપે પરિનિપીતસમસ્તજડાધ્વનિ ।
અગણિતાપરચિન્મયગણ્ડિકે પ્રવિચરેયમહં ભવતોઽર્ચિતા ॥ ૫.૨૪॥

સ્વવપુષિ સ્ફુટભાસિનિ શાશ્વતે સ્થિતિકૃતે ન કિમપ્યુપયુજ્યતે ।
ઇતિ મતિઃ સુદૃઢા ભવતાત્પરં મમ ભવચ્ચરણાબ્જરજઃ શુચેઃ ॥ ૫.૨૫॥

કિમપિ નાથ કદાચન ચેતસિ સ્ફુરતિ તદ્ભવદઙ્ઘ્રિતલસ્પૃશામ્ ।
ગલતિ યત્ર સમસ્તમિદં સુધાસરસિ વિશ્વમિદં દિશ મે સદા ॥ ૫.૨૬॥

## અધ્વવિસ્ફુરણાખ્યં ષષ્ઠં સ્તોત્રમ્ ।

ક્ષણમાત્રમપીશાન વિયુક્તસ્ય ત્વયા મમ ।
નિબિડં તપ્યમાનસ્ય સદા ભૂયા દૃશઃ પદમ્ ॥ ૬.૧॥

વિયોગસારે સંસારે પ્રિયેણ પ્રભુણા ત્વયા ।

અવિયુક્તઃ સદૈવ સ્યાં જગતાપિ વિયોજિતઃ ॥ ૬.૨॥

કાયવાઙ્મનસૈર્યત્ર યામિ સર્વં ત્વમેવ તત્ ।
ઇત્યેષ પરમાર્થોઽપિ પરિપૂર્ણોઽસ્તુ મે સદા ॥ ૬.૩॥

નિર્વિકલ્પો મહાનન્દપૂર્ણો યદ્વદ્ભવાંસ્તથા ।
ભવત્સ્તુતિકરી ભૂયાદનુરૂપૈવ વાઙ્મમ ॥ ૬.૪॥

ભવદાવેશતઃ પશ્યન્ ભાવં ભાવં ભવન્મયમ્ ।
વિચરેયં નિરાકાङ્ક્ષઃ પ્રહર્ષપરિપૂરિતઃ ॥ ૬.૫॥

ભગવન્ભવતઃ પૂર્ણં પશ્યેયમખિલં જગત્ ।
તાવતૈવાસ્મિ સન્તુષ્ટસ્તતો ન પરિખિદ્યસે ॥ ૬.૬॥

વિલીયમાનાસ્ત્વય્યેવ વ્યોમ્નિ મેઘલવા ઇવ ।
ભાવા વિભાન્તુ મે શશ્વત્ક્રમનૈર્મલ્યગામિનઃ ॥ ૬.૭॥

સ્વપ્રભાપ્રસરધ્વસ્તાપર્યન્તધ્વાન્તસન્તતિઃ ।
સન્તતં ભાતુ મે કોઽપિ ભવમધ્યાદ્ભવન્મણિઃ ॥ ૬.૮॥

કાં ભૂમિકાં નાધિશેષે કિં તત્સ્યાદ્યન્ન તે વપુઃ ।
શ્રાન્તસ્તેનાપ્રયાસેન સર્વતસ્ત્વામવાપ્નુયામ્ ॥ ૬.૯॥

ભવદઙ્ગપરિષ્વઙ્ગસમ્ભોગઃ સ્વેચ્છયૈવ મે ।
ઘટતામિયતિ પ્રાપ્તે કિં નાથ ન જિતં મયા ॥ ૬.૧૦॥

પ્રકટીભવ નાન્યાભિઃ પ્રાર્થનાભિઃ કદર્થનાઃ ।
કુર્મસ્તે નાથ તામ્યન્તસ્ત્વામેવ મૃગયામહે ॥ ૬.૧૧॥

## વિધુરવિજયનામધેયં સપ્તમં સ્તોત્રમ્ ।

ત્વય્યાનન્દસરસ્વતિ સમરસતામેત્ય નાથ મમ ચેતઃ ।
પરિહરતુ સકૃદિયન્તં ભેદાધીનં મહાનર્થમ્ ॥ ૭.૧॥

એતન્મમ ન ત્વિદમિતિ રાગદ્વેષાદિનિગડદૃઢમૂલે ।
નાથ ભવન્મયતૈક્યપ્રત્યયપરશુઃ પતત્વન્તઃ ॥ ૭.૨॥

ગલતુ વિકલ્પકલङ્કાવલી સમુલ્લસતુ હૃદિ નિરર્ગલતા ।
ભગવન્નાનન્દરસપ્લુતાસ્તુ મે ચિન્મયી મૂર્તિઃ ॥ ૭.૩॥

રાગાદિમયભવાણ્ડકલુઠિતં ત્વદ્ભક્તિભાવનામ્બિકા તૈસ્તૈઃ ।
આપ્યાયયતુ રસૈર્માં પ્રવૃદ્ધપક્ષો યથા ભવામિ ખગઃ ॥ ૭.૪॥

ત્વચ્ચરણભાવનામૃતરસસારાસ્વાદનૈપુણં લભતામ્ ।
ચિત્તમિદં નિઃશેષિતવિષયવિષાસઙ્ગવાસનાવધિ મે ॥ ૭.૫॥

ત્વદ્ભક્તિતપનદીધિતિસંસ્પર્શવશાન્મમૈષ દૂરતરમ્ ।
ચેતોમણિર્વિમૂઞ્ચતુરાગાદિકતપ્તવહ્નિકણાન્ ॥ ૭.૬॥

તસ્મિન્ પદે ભવન્તં સતતમુપશ્લોકયેયમત્યુચ્ચૈઃ ।
હરિહર્યશ્વવિરિઞ્ચા અપિ યત્ર બહિઃ પ્રતીક્ષન્તે ॥ ૭.૭॥

ભક્તિમદજનિતવિભ્રમવશેન પશ્યેયમવિકલં કરણૈઃ ।
શિવમયમખિલં લોકં ક્રિયાશ્ચ પૂજામયી સકલાઃ ॥ ૭.૮॥

મામકમનોગૃહીતત્વદ્ભક્તિકુલાઙ્ગનાણિમાદિસુતાન્ ।
સૂત્વા સુબદ્ધમૂલા મમેતિ બુદ્ધિં દૃઢીકુરુતામ્ ॥ ૭.૯॥

## અલૌકિકોદ્ધલનાખ્યમષ્ટમં સ્તોત્રમ્ ।

યઃ પ્રસાદલવ ઈશ્વરસ્થિતો યા ચ ભક્તિરિવ મામુપેયુષી ।
તૌ પરસ્પરસમન્વિતૌ કદા તાદૃશે વપુષિ રૂઢિમેષ્યતઃ ॥ ૮.૧॥

ત્વત્પ્રભુત્વપરિચર્વણજન્મા કોઽપ્યુદેતુ પરિતોષરસોઽન્તઃ ।
સર્વકાલમિહ મે પરમસ્તુ જ્ઞાનયોગમહિમાદિ વિદૂરે ॥ ૮.૨॥

લોકવદ્ભવતુ મે વિષયેષુ સ્ફીત એવ ભગવન્પરિતર્ષઃ ।
કેવલં તવ શરીરતયૈતાન્+ લોકયેયમહમસ્તવિકલ્પઃ ॥ ૮.૩॥

દેહભૂમિષુ તથા મનસિ ત્વં પ્રાણવર્ત્મનિ ચ ભેદમુપેતે ।
સંવિદઃ પથિષુ તેષુ ચ તેન સ્વાત્મના મમ ભવ સ્ફુટરૂપઃ ॥ ૮.૪॥

નિજનિજેષુ પદેષુ પતન્ત્વિમાઃ કરણવૃત્તય ઉલ્લસિતા મમ ।
ક્ષણમપીશ મનાગપિ મૈવ ભૂત્ત્વદવિભેદરસક્ષતિસાહસમ્ ॥ ૮.૫॥

લઘુમસૃણસિતાચ્છશીતલં ભવદાવેશવશેન ભાવયન્ ।
વપુરખિલપદાર્થપદ્ધતેર્વ્યવહારાનતિવર્તયેય તાન્ ॥ ૮.૬॥

વિકસતુ સ્વવપુર્ભવદાત્મકં સમુપયાન્તુ જગન્તિ મમાઙ્ગતામ્ ।

વ્રજતુ સર્વમિદં દ્વયવલ્ગિતં સ્મૃતિપથોપગમેઽપ્યનુપાખ્યતામ્ ॥ ૮.૭॥

સમુદિયાદપિ તાદૃશતાવકાનન વિલોક પરામૃતસમ્પ્લવઃ ।
મમ ઘટેત યથા ભવદદ્વયાપ્રથનઘોરદરીપરિપૂરણમ્ ॥ ૮.૮॥

અપિ કદાચન તાવકસઙ્ગમામૃતકણાચ્છુરણેન તનીયસા ।
સકલલોકસુખેષુ પરાઙ્મુખો ન ભવિતાસ્મ્યુભયચ્યુત એવ કિમ્ ॥ ૮.૯॥

સતતમેવ ભવચ્ચરણામ્બુજાકરચરસ્ય હિ હંસવરસ્ય મે ।
ઉપરિ મૂલતલાદપિ ચાન્તરાદુપનમત્વજ ભક્તિમૃણાલિકા ॥ ૮.૧૦॥

ઉપયાન્તુ વિભો સમસ્તવસ્તૂન્યપિ ચિન્તાવિષયં દૃશઃ પદં ચ ।
મમ દર્શનચિન્તનપ્રકાશામૃતસારાણિ પરં પરિસ્ફુરન્તુ ॥ ૮.૧૧॥

પરમેશ્વર તેષુ તેષુ કૃચ્છ્રેષ્વપિ નામોપનમત્સ્વહં ભવેયમ્ ।
ન પરં ગતભીસ્ત્વદઙ્ગસઙ્ગાદુપજાતાધિકસમ્મદોઽપિ યાવત્ ॥ ૮.૧૨॥

ભવદાત્મનિ વિશ્વમુમ્ભિતં યદ્ભવતૈવાપિ બહિઃ પ્રકાશ્યતે તત્ ।
ઇતિ યદ્દૃઢનિશ્ચયોપજુષ્ટં તદિદાનિં સ્ફુટમેવ ભાસતામ્ ॥ ૮.૧૩॥

## સ્વાતન્ત્ર્યવિજયાખ્યં નવમં સ્તોત્રમ્ ।

કદા નવરસાર્દ્રાર્દ્રસમ્ભોગાસ્વાદનોત્સુકમ્ ।
પ્રવર્તેત વિહાયાન્યન્મમ ત્વત્સ્પર્શને મનઃ ॥ ૯.૧॥

ત્વદેકરક્તસ્ત્વત્પાદપૂજામાત્રમહાધનઃ ।
કદા સાક્ષાત્કરિષ્યામિ ભવન્તમયમુત્સુકઃ ॥ ૯.૨॥

ગાઢાનુરાગવશતો નિરપેક્ષીભૂતમાનસોઽસ્મિ કદા ।
પટપટિતિ વિઘટિતાખિલમહાર્ગલસ્ત્વામુપૈષ્યામિ ॥ ૯.૩॥

સ્વસંવિત્સારહૃદયાધિષ્ઠાનાઃ સર્વદેવતાઃ ।
કદા નાથ વશીકુર્યાં ભવદ્ભક્તિપ્રભાવતઃ ॥ ૯.૪॥

કદા મે સ્યાદ્વિભો ભૂરિ ભક્ત્યાનન્દરસોત્સવઃ ।
યદાલોકસુખાનન્દી પૃથઙ્નામાપિ લપ્સ્યતે ॥ ૯.૫॥

ઈશ્વરમભયમુદારં પૂર્ણમકારણમપહ્નુતાત્માનમ્ ।
સહસાભિજ્ઞાય કદા સ્વામિજનં લજ્જયિષ્યામિ ॥ ૯.૬॥

કદા કામપિ તાં નાથ તવ વલ્લભતામિયામ્ ।
યયા માં પ્રતિ ન ક્વાપિ યુક્તં તે સ્યાત્પલાયિતુમ્ ॥ ૯.૭ ॥

તત્ત્વતોઽશેષજન્તૂનાં ભવત્પૂજામયાત્મનામ્ ।
દૃષ્ટ્યાનુમોદિતરસાપ્લાવિતઃ સ્યાં કદા વિભો ॥ ૯.૮ ॥

જ્ઞાનસ્ય પરમા ભૂમિર્યોગસ્ય પરમા દશા ।
ત્વદ્ભક્તિર્યા વિભો કર્હિ પૂર્ણા મે સ્યાત્તદર્થિતા ॥ ૯.૯ ॥

સહસૈવસાદ્ય કદા ગાઢમવષ્ટભ્ય હર્ષવિવશોઽહમ્ ।
ત્વચ્ચરણવરનિધાનં સર્વસ્ય પ્રકટયિષ્યામિ ॥ ૯.૧૦ ॥

પરિતઃ પ્રસરચ્છુદ્ધત્વદાલોકમયઃ કદા ।
સ્યાં યથેશ ન કિઞ્ચિન્મે માયાચ્છાયાબિલં ભવેત્ ॥ ૯.૧૧ ॥

આત્મસાત્કૃતનિઃશેષમણ્ડલો નિર્વ્યપેક્ષકઃ ।
કદા ભવેયં ભગવંસ્ત્વદ્ભક્તગણનાયકઃ ॥ ૯.૧૨ ॥

નાથ લોકાભિમાનાનામપૂર્વં ત્વં નિબન્ધનમ્ ।
મહાભિમાનઃ કર્હિ સ્યાં ત્વદ્ભક્તિરસપૂરિતઃ ॥ ૯.૧૩ ॥

અશેષવિષયાશૂન્યશ્રીસમાશ્લેષસુસ્થિતઃ ।
શયીયમિવ શીતાઙ્ઘ્રિકુશેશયયુગે કદા ॥ ૯.૧૪ ॥

ભક્ત્યાસવસમૃદ્ધાયાસ્ત્વત્પૂજાભોગસમ્પદઃ ।
કદા પારં ગમિષ્યામિ ભવિષ્યામિ કદા કૃતી ॥ ૯.૧૫ ॥

આનન્દબાષ્પપૂરસ્ખલિતપરિભ્રાન્તગદ્ગદાક્રન્દઃ ।
હાસોલ્લાસિતવદનસ્ત્વત્સ્પર્શરસં કદાપ્સ્યામિ ॥ ૯.૧૬ ॥

પશુજનસમાનવૃત્તામવધૂય દશામિમાં કદા શમ્ભો ।
આસ્વાદયેય તાવકભક્તોચિતમાત્મનો રૂપમ્ ॥ ૯.૧૭ ॥

લબ્ધાણિમાદિસિદ્ધિર્વિગલિતસકલોપતાપસન્ત્રાસઃ ।
ત્વદ્ભક્તિરસાયનપાનક્રિઢાનિષ્ટઃ કદાસીય ॥ ૯.૧૮ ॥

નાથ કદા સ તથાવિધ આક્રન્દો મે સમુચ્ચરેદ્વાચિ ।
યત્સમનન્તરમેવ સ્ફુરતિ પુરસ્તાવકી મૂર્તિઃ ॥ ૯.૧૯ ॥

ગાઢગાઢભવદઙ્ઘ્રિસરોજાલિઙ્ગનવ્યસનતત્પરચેતાઃ ।
વસ્ત્વવસ્ત્વિદમયત્નત એવ ત્વાં કદા સમવલોકયિતાસ્મિ ॥ ૯.૨૦ ॥

## અવિચ્છેદભઙ્ગાખ્યં દશમં સ્તોત્રમ્ ।

ન સોઢવ્યમવશ્યં તે જગદેકપ્રભોરિદમ્ ।
માહેશ્વરાશ્ચ લોકાનામિતરેષાં સમાશ્ચ યત્ ॥ ૧૦.૧॥

યે સદૈવાનુરાગેણ ભવત્પાદાનુગામિનઃ ।
યત્ર તત્ર ગતા ભોગાંસ્તે કાંશ્ચિદુપભુઞ્જતે ॥ ૧૦.૨॥

ભર્તા કાલાન્તકો યત્ર ભવાંસ્તત્ર કુતો રુજઃ ।
તત્ર ચેતરભોગાશા કા લક્ષ્મીર્યત્ર તાવકી ॥ ૧૦.૩॥

ક્ષનમાત્રસુખેનાપિ વિભુર્યેનાસિ લભ્યસે ।
તદૈવ સર્વઃ કાલોઽસ્ય ત્વદાનન્દેન પૂર્યતે ॥ ૧૦.૪॥

આનન્દરસબિન્દુસ્તે ચન્દ્રમા ગલિતો ભુવિ ।
સૂર્યસ્તથા તે પ્રસૃતઃ સંહારી તેજસઃ કણઃ ॥ ૧૦.૫॥

બલિં યામસ્તૃતીયાય નેત્રાયાસ્મૈ તવ પ્રભો ।
અલૌકિકસ્ય કસ્યાપિ માહાત્મ્યસ્યૈકલક્ષ્મણે ॥ ૧૦.૬॥

તેનૈવ દૃષ્ટોઽસિ ભવદ્દર્શનાદ્યોઽતિહૃષ્યતિ ।
કથઞ્ચિદ્યસ્ય વા હર્ષઃ કોઽપિ તેન ત્વમીક્ષિતઃ ॥ ૧૦.૭॥

યેષાં પ્રસન્નોઽસિ વિભો યૈર્લબ્ધં હૃદયં તવ ।
આકૃષ્ય ત્વત્પુરાત્તૈસ્તુ બાહ્યમાભ્યન્તરીકૃતમ્ ॥ ૧૦.૮॥

ત્વદૃતે નિખિલં વિશ્વં સમદૃગ્યાતમીક્ષ્યતામ્ ।
ઈશ્વરઃ પુનરેતસ્ય ત્વમેકો વિષમેક્ષણઃ ॥ ૧૦.૯॥

આસ્તાં ભવત્પ્રભાવેણ વિના સત્તૈવ નાસ્તિ યત્ ।
ત્વદ્દૂષણકથા યેષાં ત્વદૃતે નોપપદ્યતે ॥ ૧૦.૧૦॥

બાહ્યાન્તરાન્તરાયાલીકેવલે ચેતસિ સ્થિતિઃ ।
ત્વયિ ચેત્સ્યાન્મમ વિભો કિમન્યદુપયુજ્યતે ॥ ૧૦.૧૧॥

અન્યે ભ્રમન્તિ ભગવન્નાત્મન્યેવાતિદુઃસ્થિતાઃ ।
અન્યે ભ્રમન્તિ ભગવન્નાત્મન્યેવાતિસુસ્થિતાઃ ॥ ૧૦.૧૨॥

અપીત્વાપિ ભવદ્ભક્તિસુધામનવલોક્ય ચ ।
ત્વામીશ ત્વત્સમાચારમાત્રાત્સિદ્ધ્યન્તિ જન્તવઃ ॥ ૧૦.૧૩ ॥

ભૃત્યા વયં તવ વિભો તેન ત્રિજગતાં યથા ।
બિભર્ષ્યાત્માનમેવં તે ભર્ત્તવ્યા વયમપ્યલમ્ ॥ ૧૦.૧૪ ॥

પરાનન્દામૃતમયે દૃષ્ટોઽપિ જગદાત્મનિ ।
ત્વયિ સ્પર્શરસેઽત્યન્તતરસુત્કણ્ઠિતો(?)ઽસ્મિ તે ॥ ૧૦.૧૫ ॥

દેવ દુઃખાન્યશેષાણિ યાનિ સંસારિણામપિ ।
ધૃત્યાખ્યભવદીયાત્મયુતાન્યાયાન્તિ સહ્યતામ્ ॥ ૧૦.૧૬ ॥

સર્વજ્ઞે સર્વશક્તૌ ચ ત્વય્યેવ સતિ ચિન્મયે ।
સર્વથાપ્યસતો નાથ યુક્તાસ્ય જગતઃ પ્રથા ॥ ૧૦.૧૭ ॥

ત્વત્પ્રાણિતાઃ સ્ફુરન્તીમે ગુણા લોષ્ટોપમા અપિ ।
નૃત્યન્તિ પવનોદ્ધૂતાઃ કાર્પાસાઃ પિચવો યથા ॥ ૧૦.૧૮ ॥

યદિ નાથ ગુણેષ્વાત્માભિમાનો ન ભવેત્તતઃ ।
કેન હીયેત જગતસ્ત્વદેકાત્મતયા પ્રથા ॥ ૧૦.૧૯ ॥

વન્દ્યાસ્તેઽપિ મહીયાંસઃ પ્રલયોપગતા અપિ ।
ત્વત્કોપપાવકસ્પર્શપૂતા યે પરમેશ્વર ॥ ૧૦.૨૦ ॥

મહાપ્રકાશવપુષિ વિસ્પષ્ટે ભવતિ સ્થિતે ।
સર્વતોઽપીશ તત્કસ્માત્તમસિ પ્રસરામ્યહમ્ ॥ ૧૦.૨૧ ॥

અવિભાગો ભવાનેવ સ્વરૂપમમૃતં મમ ।
તથાપિ મર્ત્યધર્માણામહમેવૈકમાસ્પદમ્ ॥ ૧૦.૨૨ ॥

મહેશ્વરેતિ યસ્યાસ્તિ નામકં વાગ્વિભૂષણમ્ ।
પ્રણામાઙ્કશ્ચ શિરસિ સ એવૈકઃ પ્રભાવિતઃ ॥ ૧૦.૨૩ ॥

સદસચ્ચ ભવાનેવ યેન તેનાપ્રયાસતઃ ।
સ્વરસેનૈવ ભગવંસ્તથા સિદ્ધિઃ કથં ન મે ॥ ૧૦.૨૪ ॥

શિવદાસઃ શિવૈકાત્મા કિં યન્નાસાદયેત્સુખમ્ ।
તર્પ્યોઽસ્મિ દેવમુખ્યાનામપિ યેનામૃતાસવૈઃ ॥ ૧૦.૨૫ ॥

હૃન્નાભ્યોરન્તરાલસ્થઃ પ્રાણિનાં પિત્તવિગ્રહઃ ।
ગ્રસસે ત્વં મહાવહ્નિઃ સર્વં સ્થાવરજઙ્ગમમ્ ॥ ૧૦.૨૬ ॥

## ઔત્સુક્યવિશ્વસિતનામૈકાદશં સ્તોત્રમ્ ।

જગદિદમથવા સુહૃદો બન્ધુજનો વા ન ભવતિ મમ કિમપિ ।
ત્વં પુનરેતત્સર્વં યદા તદા કોઽપરો મેઽસ્તુ ॥ ૧૧.૧॥

સ્વામિન્મહેશ્વરસ્ત્વં સાક્ષાત્સર્વં જગત્ત્વમેવેતિ ।
વસ્ત્વેવ સિદ્ધિમેત્વિતિ યાચ્ઞા તત્રાપિ યાચ્ઞૈવ ॥ ૧૧.૨॥

ત્રિભુવનાધિપતિત્વમપીહ યત્તૃણમિવ પ્રતિભાતિ ભવજ્જુષઃ ।
કિમિવ તસ્ય ફલં શુભકર્મણો ભવતિ નાથ ભવત્સ્મરણાદૃતે ॥ ૧૧.૩॥

યેન નૈવ ભવતોઽસ્તિ વિભિન્નં કિઞ્ચનાપિ જગતાં પ્રભવશ્ચ ।
ત્વદ્વિજૃમ્ભિતમતોઽદ્ભુતકર્મસ્વપ્યુદેતિ ન તવ સ્તુતિબન્ધઃ ॥ ૧૧.૪॥

ત્વન્મયોઽસ્મિ ભવદર્ચનનિષ્ઠઃ સર્વદાહમિતિ ચાપ્યવિરામમ્ ।
ભાવયન્નપિ વિભો સ્વરસેન સ્વપ્નગોઽપિ ન તથા કિમિવ સ્યામ્ ॥ ૧૧.૫॥

યે મનાગપિ ભવચ્ચરણાબ્જોદ્ભૂતસૌરભલવેન વિમૃષ્ટઃ ।
તેષુ વિસ્રમિવ ભવતિ સમસ્તં ભોગજાતમમરૈરપિ મૃગ્યમ્ ॥ ૧૧.૬॥

હૃદિ તે ન તુ વિદ્યતેઽન્યદન્યદ્વચને કર્મણિ ચાન્યદેવ શમ્ભો ।
પરમાર્થસતોઽપ્યનુગ્રહો વા યદિ વા નિગ્રહ એક એવ કાર્યઃ ॥ ૧૧.૭॥

મૂઢોઽસ્મિ દુઃખકલિતોઽસ્મિ જરાદિદોષભીતોઽસ્મિ
શક્તિરહિતોઽસ્મિ તવાશ્રિતોઽસ્મિ
શમ્ભો તથા કલય શીઘ્રમુપૈમિ યેન ।
સર્વોત્તમાં ધુરમપોજ્ઝિતદુઃખમાર્ગઃ ॥ ૧૧.૮॥

ત્વત્કર્ણદેશમ ધિશય્ય મહાર્ઘભાવમાક્રન્દિતાનિ મમ તુચ્છતરાણિ યાન્તિ ।
વંશાન્તરાલપતિતાનિ જલૈકદેશખણ્ડાનિ મૌક્તિકમણિત્વમિવોદ્વહન્તિ ॥ ૧૧.૯॥

કિમિવ ચ લભ્યતે બત ન તૈરપિ નાથ જનૈઃ
ક્ષણમપિ કૈતવાદપિ ચ યે તવ નામ્નિ રતાઃ
શિશિરમયૂખશેખર તથા કુરુ યેન મમ ।
ક્ષતમરણોઽણિમાદિકમુપૈમિ યથા વિભવમ્ ॥ ૧૧.૧૦॥

શમ્ભો શર્વ શશાઙ્કશેખર શિવ ત્ર્યક્ષાક્ષમાલાધર

શ્રીમન્નુગ્રકપાલલાઞ્છન લસદ્ભીમત્રિશૂલાયુધ
કારુણ્યામ્બુનિધે ત્રિલોકરચનાશીલોગ્રશક્ત્યાત્મક શ્રીકણ્ઠાશુ ।
વિનાશયાશુભભરાનાધત્સ્વસિદ્ધિં પરામ્ ॥ ૧૧.૧૧॥

તત્કિં નાથ ભવેન્ન યત્ર ભગવાન્નિર્માતૃતામશ્નુતે
ભાવઃ સ્યાત્કિમુ તસ્ય ચેતનવતો નાશાસ્તિ યં શઙ્કરઃ
ઇત્થં તે પરમેશ્વરાક્ષતમહાશક્તેઃ સદા સંશ્રિતઃ ।
સંસારેઽત્ર નિરન્તરાધિવિધુરઃ ક્લિશ્યામ્યહં કેવલમ્ ॥ ૧૧.૧૨॥

યદ્યપ્યત્ર વરપ્રદોદ્ધતતમાઃ પીડાજરામૃત્યવ
એતે વા ક્ષણમાસતાં બહુમતઃ શબ્દાદિરેવાસ્થિરઃ
તત્રાપિ સ્પૃહયામિ સન્તતસુખાકાઙ્ક્ષી ચિરં સ્થાસ્નવે ।
ભોગાસ્વાદયુતત્વદઙ્ઘ્રિકમલધ્યાનાગ્ર્ય જીવાતવે ॥ ૧૧.૧૩॥

હે નાથ પ્રણતાર્તિનાશનપટો શ્રેયોનિધે ધૂર્જટે
દુઃખૈકાયતનસ્ય જન્મમરણત્રસ્તસ્ય મે સામ્પ્રતમ્
તચ્ચેષ્ટસ્વ યથા મનોજ્ઞવિષયાસ્વાદપ્રદા ઉત્તમા ।
જીવન્નેવ સમશ્નુવેઽહમચલાઃ સિદ્ધીસ્ત્વદર્ચાપરઃ ॥ ૧૧.૧૪॥

નમો મોહમહાધ્વાન્તધ્વંસનાનન્યકર્મણે ।
સર્વપ્રકાશાતિશયપ્રકાશાયેન્દુલક્ષ્મણે ॥ ૧૧.૧૫॥

## રહસ્યનિર્દેશનામ દ્વાદશં સ્તોત્રમ્ ।

સહકારિ ન કિઞ્ચિદિષ્યતે ભવતો ન પ્રતિબન્ધકં દૃષિ ।
ભવતૈવ હિ સર્વમાપ્લુતં કથમદ્યાપિ તથાપિ નેક્ષસે ॥ ૧૨.૧॥

અપિ ભાવગણાદપીન્દ્રિયપ્રચયાદપ્યવબોધમધ્યતઃ ।
પ્રભવન્તમપિ સ્વતઃ સદા પરિપશ્યેયમપોઢવિશ્વકમ્ ॥ ૧૨.૨॥

કથં તે જાયેરન્ કથમપિ ચ તે દર્શનપથં
વ્રજેયુઃ કેનાપિ પ્રકૃતિમહતાઙ્કેન ખચિતઃ
તથોત્થાયોત્થાય સ્થલજલતૃણાદેરખિલતઃ ।
પદાર્થદ્યાન્સૃષ્ટિસ્રવદમૃતપૂરૈર્(?) વિકિરસિ ॥ ૧૨.૩॥

સાક્ષત્કૃત ભવદ્રૂપપ્રસૃતામૃતતર્પિતાઃ ।

ઉન્મૂલિતતૃષો મત્તા વિચરન્તિ યથારુચિ ॥ ૧૨.૪॥

ન તદા ન સદા ન ચૈકદેત્યપિ સા યત્ર ન કાલધીર્ભવેત્ ।
તદિદં ભવદીયદર્શનં ન ચ નિત્યં ન ચ કથ્યતેઽન્યથા ॥ ૧૨.૫॥

ત્વદ્વિલોકનસમુત્કચેતસો યોગસિદ્ધિરિયતી સદાસ્તુ મે ।
યદ્વિશેયમભિસન્ધિમાત્રતસ્ત્વત્સુધાસદનમર્ચનાય તે ॥ ૧૨.૬॥

નિર્વિકલ્પભવદીયદર્શનપ્રાપ્તિફુલ્લમનસાં મહાત્મનામ્ ।
ઉલ્લસન્તિ વિમલાનિ હેલયા ચેષ્ટિતાનિ ચ વચાંસિ ચ સ્ફુટમ્ ॥ ૧૨.૭॥

ભવન્ભવદીયપાદયોર્નિવસન્નન્તર એવ નિર્ભયઃ ।
ભવભૂમિષુ તાસુ તાસ્વહં પ્રભુમર્ચેયમનર્ગલક્રિયઃ ॥ ૧૨.૮॥

ભવદઙ્ઘ્રિસરોરુહોદરે પરિલીનો ગલિતપરૈષણઃ ।
અતિમાત્રમધૂપયોગતઃ પરિતૃપ્તો વિચરેયમિચ્છયા ॥ ૧૨.૯॥

યસ્ય દમ્ભાદિવ ભવત્પૂજાસઙ્કલ્પ ઉત્થિતઃ ।
તસ્યાપ્યવશ્યમુદિતં સન્નિધાનં તવોચિતમ્ ॥ ૧૨.૧૦॥

ભગવન્નિતરાનપેક્ષિણા નિતરામેકરસેન ચેતસા ।
સુલભં સકલોપશાયિનં પ્રભુમાતૃપ્તિ પિબેયમસ્મિ કિમ્ ॥ ૧૨.૧૧॥

ત્વયા નિરાકૃતં સર્વં હેયમેતત્તદેવ તુ ।
ત્વન્મયં સમુપાદેયમિત્યયં સારસઙ્ગ્રહઃ ॥ ૧૨.૧૨॥

ભવતોઽન્તરચારિ ભાવજાતં પ્રભુવન્મુખ્યતયૈવ પૂજિતં તત્ ।
ભવતો બહિરપ્યભાવમાત્રા કથમીશાન્ ભવેત્સમર્ચ્યતે વા ॥ ૧૨.૧૩॥

નિઃશબ્દં નિર્વિકલ્પં ચ નિર્વ્યાક્ષેપમથાનિશમ્ ।
ક્ષોભેઽપ્યધ્યક્ષમી ક્ષેયં ત્ર્યક્ષ ત્વામેવ સર્વતઃ ॥ ૧૨.૧૪॥

પ્રકટય નિજધામ દેવ યસ્મિંસ્ત્વમસિ સદા પરમેશ્વરીસમેતઃ ।
પ્રભુચરણરજઃસમાનકક્ષ્યાઃ કિમવિશ્વાસપદં ભાન્તિ ભૃત્યાઃ ॥ ૧૨.૧૫॥

દર્શનપથમુપયાતોઽપ્યપસરસિ કુતો મમેશ ભૃત્યસ્ય ।
ક્ષણમાત્રકમિહ ન ભવસિ કસ્ય ન જન્તોર્દૃશોર્વિષયઃ ॥ ૧૨.૧૬॥

ઐક્યસંવિદમૃતાચ્છધારયા સન્તતપ્રસૃતયા કદા વિભો ।
પ્લાવનાત્પરમભેદમાનયંસ્ત્વાં નિજં ચ વપુરાપ્નુયાં મુદમ્ ॥ ૧૨.૧૭॥

અહમિત્યમુતોઽવરુદ્ધલોકાદ્ભવદીયાત્પ્રતિપત્તિસારતો મે ।
અણુમાત્રકમેવ વિશ્વનિષ્ઠં ઘટતાં યેન ભવેયમર્ચિતા તે ॥ ૧૨.૧૮॥

અપરિમિતરૂપમહં તં તં ભાવં પ્રતિક્ષણં પશ્યન્ ।
ત્વામેવ વિશ્વરૂપં નિજનાથં સાધુ પશ્યેયમ્ ॥ ૧૨.૧૯॥

ભવદઙ્ગગતં તમેવ કસ્માન્ન મનઃ પર્યટતીષ્ટમર્થમર્થમ્ ।
પ્રકૃતિક્ષતિરસ્તિ નો તથાસ્ય મમ ચેચ્છા પરિપૂર્યતે પરૈવ ॥ ૧૨.૨૦॥

શતશઃ કિલ તે તવાનુભાવાદ્ભગવન્ કેઽપ્યમુનૈવ ચક્ષુષા યે ।
અપિ હાલિકચેષ્ટયા ચરન્તઃ પરિપશ્યન્તિ ભવદ્વપુઃ સદાગ્રે ॥ ૧૨.૨૧॥

ન સા મતિરુદેતિ યા ન ભવતિ ત્વદિચ્છામયી સદા
શુભમથેતરદ્ભગવતૈવમાચર્યતે અતોઽસ્મિ ભવદાત્મકો ભુવિ યથા ।
તથા સઞ્ચરન્ સ્થિ તોઽનિશમબાધિતત્વદમલઙ્ઘ્રિપૂજોત્સવઃ ॥ ૧૨.૨૨॥

ભવદીયગભીરભાષિતેષુ પ્રતિભા સમ્યગુદેતુ મે પુરોઽતઃ ।
તદનુષ્ઠિતશક્તિરપ્યતસ્તદ્ભવદર્ચાવ્યસનં ચ નિર્વિરામમ્ ॥ ૧૨.૨૩॥

વ્યવહારપદેઽપિ સર્વદા પ્રતિભાત્વર્થકલાપ એષ મામ્ ।
ભવતોઽવયવો યથા ન તુ સ્વત એવાદરણીયતાં ગતઃ ॥ ૧૨.૨૪॥

મનસિ સ્વરસેન યત્ર તત્ર પ્રચરત્યપ્યહમસ્ય ગોચરેષુ ।
પ્રસૃતોઽપ્યવિલોલ એવ યુષ્મત્પરિચર્યાચતુરઃ સદા ભવેયમ્ ॥ ૧૨.૨૫॥

ભગવન્ ભવદિચ્છયૈવ દાસસ્તવ જાતોઽસ્મિ પરસ્ય નાત્ર શક્તિઃ ।
કથમેષ તથાપિ વક્ત્રબિમ્બં તવ પશ્યામિ ન જાતુ ચિત્રમેતત્ ॥ ૧૨.૨૬॥

સમુત્સુકાસ્ત્વાં પ્રતિ યે ભવન્તં પ્રત્યર્થરૂપાદવલોકયન્તિ ।
તેષામહો કિં તદુપસ્થિતં સ્યાત્કિં સાધનં વા ફલિતં ભવેત્તત્ ॥ ૧૨.૨૭॥

ભાવા ભાવતયા સન્તુ ભવદ્ભાવેન મે ભવ ।
તથા ન કિઞ્ચિદપ્યસ્તુ ન કિઞ્ચિદ્ભવતોઽન્યથા ॥ ૧૨.૨૮॥

યન્ન કિઞ્ચિદપિ તન્ન કિઞ્ચિદપ્યસ્તુ કિઞ્ચિદપિ કિઞ્ચિદેવ મે ।
સર્વથા ભવતુ તાવતા ભવાન્ સર્વતો ભવતિ લબ્ધપૂજિતઃ ॥ ૧૨.૨૯॥

## સઙ્ગ્રહસ્તોત્રનામ ત્રયોદશં સ્તોત્રમ્ ।

સઙ્ગ્રહેન સુખદુઃખલક્ષણં માં પ્રતિ સ્થિતમિદં શ‌ૃણુ પ્રભો ।
સૌખ્યમેષ ભવતા સમાગમઃ સ્વામિના વિરહ એવ દુઃખિતા ॥ ૧૩.૧॥

અન્તરપ્યતિતરામણીયસી યા ત્વદપ્રથનકાલિકાસ્તિ મે ।
તામપીશ પરિમૃજ્ય સર્વતઃ સ્વં સ્વરૂપમમલં પ્રકાશય ॥ ૧૩.૨॥

તાવકે વપુષિ વિશ્વનિર્ભરે ચિત્સુધારસમયે નિરત્યયે ।
તિષ્ઠતઃ સતતમર્ચતઃ પ્રભું જીવિતં મૃતમથાન્યદસ્તુ મે ॥ ૧૩.૩॥

ઈશ્વરોઽહમહમેવ રૂપવાન્ પણ્ડિતોઽસ્મિ સુભગોઽસ્મિ કોઽપરઃ ।
મત્સમોઽસ્તિ જગતીતિ શોભતે માનિતા ત્વદનુરાગિણઃ પરમ્ ॥ ૧૩.૪॥

દેવદેવ ભવદદ્વયામૃતાખ્યાતિસંહરણલબ્ધજન્મના ।
તદ્યથાસ્થિતપદાર્થસંવિદા માં કુરુષ્વ ચરણાર્ચનોચિતમ્ ॥ ૧૩.૫॥

ધ્યાયતે તદનુ દૃશ્યતે તતઃ સ્પૃશ્યતે ચ પરમેશ્વરઃ સ્વયમ્ ।
યત્ર પૂજનમહોત્સવઃ સ મે સર્વદાસ્તુ ભવતોઽનુભાવતઃ ॥ ૧૩.૬॥

યદ્યથાસ્થિતપદાર્થદર્શનં યુષ્મદર્ચનમહોત્સવશ્ચ યઃ ।
યુગ્મમેતદિતરેતરાશ્રયં ભક્તિશાલિષુ સદા વિજૃમ્ભતે ॥ ૧૩.૭॥

તત્તદિન્દ્રિયમુખેન સન્તતં યુષ્મદર્ચનરસાયનાસવમ્ ।
સર્વભાવચષકેષુ પૂરિતેષ્વાપિબન્નપિ ભવેયમુન્મદઃ ॥ ૧૩.૮॥

અન્યવેદ્યમણુમાત્રમસ્તિ ન સ્વપ્રકાશમખિલં વિજૃમ્ભતે ।
યત્ર નાથ ભવતઃ પુરે સ્થિતં તત્ર મે કુરુ સદા તવાર્ચિતુઃ ॥ ૧૩.૯॥

દાસધામ્નિ વિનિયોજિતોઽપ્યહં સ્વેચ્છયૈવ પરમેશ્વર ત્વયા ।
દર્શનેન ન કિમસ્મિ પાત્રિતઃ પાદસંવહનકર્મણાપિ વા ॥ ૧૩.૧૦॥

શક્તિપાતસમયે વિચારણં પ્રાપ્તમીશ ન કરોષિ કર્હિચિત્ ।
અદ્ય માં પ્રતિ કિમાગતં યતઃ સ્વપ્રકાશનવિધૌ વિલમ્બસે ॥ ૧૩.૧૧॥

તત્ર તત્ર વિષયે બહિર્વિભાત્યન્તરે ચ પરમેશ્વરીયુતમ્ ।
ત્વાં જગત્ત્રિતયનિર્ભરં સદા લોકયેય નિજપાણિપૂજિતમ્ ॥ ૧૩.૧૨॥

સ્વામિસૌધમભિસન્ધિમાત્રતો નિર્વિબન્ધમધિરુહ્ય સર્વદા ।
સ્યાં પ્રસાદ પરમામૃતાસવાપાનકેલિપરિલબ્ધનિર્વૃતિઃ ॥ ૧૩.૧૩॥

યત્સમસ્તસુભગાર્થવસ્તુષુ સ્પર્શમાત્રવિધિના ચમત્કૃતિમ્ ।
તાં સમર્પયતિ તેન તે વપુઃ પૂજયન્ત્યચલભક્તિશાલિનઃ ॥ ૧૩.૧૪॥

સ્ફારયસ્યખિલમાત્મના સ્ફુરન્ વિશ્વમામૃશસિ રૂપમામૃશન્ ।
યત્સ્વયં નિજરસેન ઘુર્ણસે તત્સમુલ્લસતિ ભાવમણ્ડલમ્ ॥ ૧૩.૧૫॥

યોઽવિકલ્પમિદમર્થમણ્ડલં પશ્યતીશ નિખિલં ભવદ્વપુઃ ।
સ્વાત્મપક્ષપરિપૂરિતે જગત્યસ્ય નિત્યસુખિનઃ કુતો ભયમ્ ॥ ૧૩.૧૬॥

કણ્ઠકોણવિનિવિષ્ટમીશ તે કાલકૂટમપિ મે મહામૃતમ્ ।
અપ્યુપાત્તમમૃતં ભવદ્વપુર્ભેદવૃત્તિ યદિ રોચતે ન મે ॥ ૧૩.૧૭॥

ત્વત્પ્રલાપમયરક્તગીતિકાનિ ત્ય યુક્તવદનોપશોભિતઃ ।
સ્યામથાપિ ભવદર્ચનક્રિયાપ્રેયસીપરિગતાશયઃ સદા ॥ ૧૩.૧૮॥

ઈહિતં ન બત પારમેશ્વરં શક્યતે ગણયિતું તથા ચ મે ।
દત્તમપ્યમૃતનિર્ભરં વપુઃ સ્વં ન પાતુમનુમન્યતે તથા ॥ ૧૩.૧૯॥

ત્વામગાધમવિકલ્પમદ્વયં સ્વં સ્વરૂપમખિલાર્થઘસ્મરમ્ ।
આવિશન્નહમુમેશ સર્વદા પૂજયેયમભિસંસ્તુવીય ચ ॥ ૧૩.૨૦॥

## જયસ્તોત્રનામ ચતુર્દશં સ્તોત્રમ્ ।

જયલક્ષ્મીનિધાનસ્ય નિજસ્ય સ્વામિનઃ પુરઃ ।
જયોદ્ઘોષણપીયૂષરસમાસ્વાદયે ક્ષણમ્ ॥ ૧૪.૧॥

જયૈકરુદ્રૈકશિવ મહાદેવ મહેશ્વર ।
પાર્વતીપ્રણયિઞ્શર્વ સર્વગીર્વાણપૂર્વજ ॥ ૧૪.૨॥

જય ત્રૈલોક્યનાથૈકલાઞ્છનાલિકલોચન ।
જય પીતર્તલોકાર્તિકાલકૂટાઙ્કકન્ધર ॥ ૧૪.૩॥

જય મૂર્તત્રિશક્ત્યાત્મિશતશૂલોલ્લસત્કર ।
જયેચ્છામાત્રસિદ્ધાર્થપૂજાર્હચરણામ્બુજ ॥ ૧૪.૪॥

જય શોભશતસ્યન્દિલોકોત્તરવપુર્ધર ।
જયૈકજટિકાક્ષીણગઙ્ગાકૃત્યાત્તભસ્મક ॥ ૧૪.૫॥

જય ક્ષીરોદપર્યસ્તજ્યોત્સ્નાચ્છાયાનુલેપન ।

જયેશ્વરાઙ્ગસઙ્ગોત્થરત્નકાન્તાહિમણ્ડન ॥ ૧૪.૬॥

જયાક્ષયૈકશીતાંશુકલાસદૃશસંશ્રય ।
જય ગઙ્ગાસદાર્બ્ધવિશ્વૈશ્વર્યાભિષેચન ॥ ૧૪.૭॥

જયાધરાઙ્ગસંસ્પર્શપાવનીકૃતગોકુલ ।
જય ભક્તિમદાબદ્ધગોષ્ઠીનિયતસન્નિધે ॥ ૧૪.૮॥

જય સ્વેચ્છાતપોદેશવિપ્રલમ્ભિતબાલિશ ।
જય ગૌરીપરિષ્વઙ્ગયોગ્યસૌભાગ્યભાજન ॥ ૧૪.૯॥

જય ભક્તિરસાર્દ્રાર્દ્રભાવોપાયનલમ્પટ ।
જય ભક્તિમદોદ્દામભક્તવાઙ્નૃત્તતોષિત ॥ ૧૪.૧૦॥

જય બ્રહ્માદિદેવેશપ્રભાવપ્રભવવ્યય ।
જયલોકેશ્વરશ્રેણિશિરોવિધૃતશાસન ॥ ૧૪.૧૧॥

જયસર્વજગન્ન્યસ્તસ્વમુદ્રાવ્યક્તવૈભવ ।
જયાત્મદાનપર્યન્તવિશ્વેશ્વરમહેશ્વર ॥ ૧૪.૧૨॥

જય ત્રૈલોક્યસર્ગેચ્છાવસરાસદ્વિતીયક ।
જયૈશ્વર્યભરોદ્વાહદેવીમાત્રસહાયક ॥ ૧૪.૧૩॥

જયાક્રમસમાક્રાન્તસમસ્તભુવનત્રય ।
જયાવિગીતમાબાલગીયમાનેશ્વરધ્વને ॥ ૧૪.૧૪॥

જયાનુકમ્પાદિગુણાનપેક્ષસહજોન્નતે ।
જય ભીષ્મમહામૃત્યુઘટનાપૂર્વભૈરવ ॥ ૧૪.૧૫॥

જય વિશ્વક્ષયોચ્ચણ્ડક્રિયાનિષ્પરિપન્થિક ।
જય શ્રેયઃશતગુણાનુગનામાનુકીર્તન ॥ ૧૪.૧૬॥

જય હેલાવિતીર્નૈતદમૃતાકરસાગર ।
જય વિશ્વક્ષયક્ષેપિક્ષણકોપાશુશુક્ષણે ॥ ૧૪.૧૭॥

જય મોહાન્ધકારાન્ધજીવલોકૈકદીપક ।
જય પ્રસુપ્તજગતીજાગરૂકાધિપૂરુષ ॥ ૧૪.૧૮॥

જય દેહાદ્રિકુઞ્જાન્તર્નિકૂજજ્જીવજીવક ।
જય સન્માનસવ્યોમવિલાસિવરસારસ ॥ ૧૪.૧૯॥

જય જામ્બૂનદોદગ્રધાતૂદ્ભવગિરીશ્વર ।
જય પાપિષુ નિન્દોલ્કાપાતનોત્પાતચન્દ્રમઃ ॥ ૧૪.૨૦॥

જય કષ્ટતપઃક્લિષ્ટમુનિદેવદુરાસદ ।
જય સર્વદશારૂઢભક્તિમલ્લોકલોકિત ॥ ૧૪.૨૧॥

જય સ્વસમ્પત્પ્રસરપત્રીકૃતનિજાશ્રિત ।
જય પ્રપન્નજનતાલાલનૈકપ્રયોજન ॥ ૧૪.૨૨॥

જય સર્ગસ્થિતિધ્વંસકારણૈકાવદાનક ।
જય ભક્તિમદાલોલલીલોત્પલમગોત્સવ ॥ ૧૪.૨૩॥

જય જયભાજન જય જિતજન્મજરામરણ જય જગજ્જ્યેષ્ઠ
જય જય જય જય જય જય જય જય જય ।
જય જય જય જય ત્ર્યક્ષ ॥ ૧૪.૨૪॥

## ભક્તિસ્તોત્રનામ પઞ્ચદશં સ્તોત્રમ્ ।

ત્રિમલક્ષાલિનો ગ્રન્થાઃ સન્તિ તત્પારગાસ્તથા ।
યોગિનઃ પણ્ડિતાઃ સ્વસ્થાસ્ત્વદ્ભક્તા એવ તત્ત્વતઃ ॥ ૧૫.૧॥

માયીયકાલનિયતિરાગાદ્યાહારતર્પિતાઃ ।
ચરન્તિ સુખિનો નાથ ભક્તિમન્તો જગત્તટે ॥ ૧૫.૨॥

રુદન્તો વા હસન્તો વા ત્વામુચ્ચૈઃ પ્રલપન્ત્યમી ।
ભક્તાઃ સ્તુતિપદોચ્ચારોપચારાઃ પૃથગેવ તે ॥ ૧૫.૩॥

ન વિરક્તો ન ચાપીશો મોક્ષાકાઙ્ક્ષી ત્વદર્ચકઃ ।
ભવેયમપિ તૂદ્રિક્તભક્ત્યાસવરસોન્મદઃ ॥ ૧૫.૪॥

બાહ્યં હૃદય એવાન્તરભિહૃત્યૈવ યોઽર્ચતિ ।
ત્વામીશ ભક્તિપીયૂષરસપૂરૈર્નમામિ તમ્ ॥ ૧૫.૫॥

ધર્માધર્માત્મનોરન્તઃ ક્રિયયોર્જ્ઞાનયોસ્તથા ।
સુખદુઃખાત્મનોર્ભક્તાઃ કિમપ્યાસ્વાદયન્ત્યહો ॥ ૧૫.૬॥

ચરાચરપિતઃ સ્વામિનપ્યન્ધા અપિ કુષ્ઠિનઃ ।
શોભન્તે પરમુદ્દામભવદ્ભક્તિવિભૂષણાઃ ॥ ૧૫.૭॥

શિલોઞ્છપિચ્છકશિપુવિચ્છાયાઙ્ગા અપિ પ્રભો ।
ભવદ્ભક્તિમહોષ્મણો રાજરાજમપીશતે ॥ ૧૫.૮॥

સુધાર્દ્રાયાં ભવદ્ભક્તૌ લુઠતાપ્યારુરુક્ષુણા ।
ચેતસૈવ વિભોઽર્ચન્તિ કેચિત્ત્વામભિતઃ સ્થિતાઃ ॥ ૧૫.૯॥

રક્ષણીયં વર્ધનીયં બહુમાન્યમિદં પ્રભો ।
સંસારદુર્ગતિહરં ભવદ્ભક્તિમહાધનમ્ ॥ ૧૫.૧૦॥

નાથ તે ભક્તજનતા યદ્યપિ ત્વયિ રાગિણી ।
તથાપીર્ષ્યાં વિહાયાસ્યાસ્તુષ્ટાસ્તુ સ્વામિની સદા ॥ ૧૫.૧૧॥

ભવદ્ભાવઃ પુરો ભાવી પ્રાપ્તે ત્વદ્ભક્તિસમ્ભવે ।
લબ્ધે દુગ્ધમહાકુમ્ભે હતા દધનિ ગૃધ્નુતા ॥ ૧૫.૧૨॥

કિમિયં ન સિદ્ધિરતુલા કિં વા મુખ્યં ન સૌખ્યમાસ્રવતિ ।
ભક્તિરુપચીયમાના યેયં શમ્ભોઃ સદાતની ભવતિ ॥ ૧૫.૧૩॥

મનસિ મલિને મદીયેમગ્ના ત્વદ્ભક્તિમણિલતા કષ્ટમ્ ।
ન નિજાનપિ તનુતે તાનપૌરુષેયાન્ સ્વસમ્પદુલ્લાસાન્ ॥ ૧૫.૧૪॥

ભક્તિર્ભગવતિ ભવતિ ત્રિલોકનાથે નનૂત્તમા સિદ્ધિઃ ।
કિં ત્વણિમાદિકવિરહાત્સૈવ ન પૂર્ણેતિ ચિન્તા મે ॥ ૧૫.૧૫॥

બાહ્યતોઽન્તરપિ ચોત્કટોન્મિષત્ત્ર્યમ્બકસ્તવકસૌરભાઃ શુભાઃ ।
વાસયન્ત્યપિ વિરુદ્ધવાસનાન્ યોગિનો નિકટવાસિનોઽખિલાન્ ॥ ૧૫.૧૬॥

જ્યોતિરસ્તિ કથયાપિ ન કિં ચિદ્વિશ્વમપ્યતિસુષુપ્તમશેષમ્ ।
યત્ર નાથ શિવરાત્રિપદેઽસ્મિન્નિત્યમર્ચયતિ ભક્તજનસ્ત્વામ્ ॥ ૧૫.૧૭॥

સત્ત્વં સત્યગુણે શિવે ભગવતિ સ્ફારીભવત્વર્ચને
ચૂડાયાં વિલસન્તુ શઙ્કરપદપ્રોદ્યદ્રજઃસઞ્ચયાઃ
રાગાદિસ્મૃતિવાસનામપિ સમુચ્છેત્તું તમો જૃમ્ભતામ્ ।
શમ્ભો મે ભવતાત્ત્વદાત્મવિલયે ત્રૈગુણ્યવર્ગોઽથવા ॥ ૧૫.૧૮॥

સંસારાધ્વા સુદૂરઃ ખરતરવિવિધવ્યાધિદગ્ધાઙ્ગયષ્ટિઃ
ભોગા નૈવોપભુક્તા યદપિ સુખમભૂજ્જાતુ નન્નો ચિરાય
ઇત્થં વ્યર્થોઽસ્મિ જાતઃ શશિધરચરણાક્રાન્તિકાન્તોત્તમાઙ્ગ-
સ્ત્વદ્ભક્તશ્ચેતિ તન્મે કુરુ સપદિ મહાસમ્પદો દીર્ઘદીર્ઘાઃ ॥ ૧૫.૧૯॥

## પાશાનુદ્ભેદનામ ષોડશં સ્તોત્રમ્ ।

ન કિઞ્ચિદેવ લોકાનાં ભવદાવરણં પ્રતિ વર્યત્કિં ચિદેવ
ભૂતાનાંએં ચિતણરેસ્વરપરીક્સા ।
ન કિઞ્ચિદેવ ભક્તાનાં ભવદાવરણં પ્રતિ ॥ ૧૬.૧॥

અપ્યુપાયક્રમપ્રાપ્યઃ સઙ્કુલોઽપિ વિશેષણૈઃ ।
ભક્તિભાજાં ભવાનાત્મા સકૃચ્છુદ્ધોઽવભાસતે ॥ ૧૬.૨॥

જયન્તોઽપિ હસન્ત્યેતે જિતા અપિ હસન્તિ ચ ।
ભવદ્ભક્તિસુધાપાનમત્તાઃ કેઽપ્યેવ યે પ્રભો ॥ ૧૬.૩॥

શુષ્કકં મૈવ સિદ્ધ્યેય મૈવ મુચ્યેય વાપિ તુ ।
સ્વાદિષ્ઠપરકાષ્ટાપ્તત્વદ્ભક્તિરસનિર્ભરઃ ॥ ૧૬.૪॥

યથૈવજ્ઞાતપૂર્વોઽયં ભવદ્ભક્તિરસો મમ ।
ઘટિતસ્તદ્વદીશાન સ એવ પરિપુષ્યતુ ॥ ૧૬.૫॥

સત્યેન ભગવન્નાન્યઃ પ્રાર્થનાપ્રસરોઽસ્તિ મે ।
કેવલં સ તથા કોઽપિ ભક્ત્યાવેશોઽસ્તુ મે સદા ॥ ૧૬.૬॥

ભક્તિક્ષીવોઽપિ કુપ્યેયં ભવાયાનુશયીય ચ ।
તથા હસેયમુદ્યાં ચ રટેયં ચ શિવેત્યલમ્ ॥ ૧૬.૭॥

વિષમસ્થોઽપિ સ્વસ્થોઽપિ રુદન્નપિ હસન્નપિ ।
ગમ્ભીરોઽપિ વિચિત્તોઽપિ ભવેયં ભક્તિતઃ પ્રભો ॥ ૧૬.૮॥

ભક્તાનાં નાસ્તિ સંવેદ્યં ત્વદન્તર્યદિ વા બહિઃ ।
ચિદ્ધર્મા યત્ર ન ભવાન્નિર્વિકલ્પઃ સ્થિતઃ સ્વયમ્ ॥ ૧૬.૯॥

ભક્તા નિન્દાનુકરેઽપિ તવામૃતકણૈરિવ ।
હૃષ્યન્ત્યેવાન્તરાવિદ્ધાસ્તીક્ષ્ણરોમાઞ્ચસૂચિભિઃ ॥ ૧૬.૧૦॥

દુઃખાપિ વેદના ભક્તિમતાં ભોગાય કલ્પતે ।
યેષાં સુધાર્દ્રા સર્વૈવ સંવિત્ત્વચ્ચન્દ્રિકામયી ॥ ૧૬.૧૧॥

યત્ર તત્રોપરુદ્ધાનાં ભક્તાનાં બહિરન્તરે ।
નિર્વ્યાજં ત્વદ્વપુઃસ્પર્શરસાસ્વાદસુખં સમમ્ ॥ ૧૬.૧૨॥

તવેશ ભક્તેરર્ચાયાં દૈન્યાંશં દ્વયસંશ્રયમ્ ।
વિલુપ્યાસ્વાદયન્ત્યેકે વપુરચ્છં સુધામયમ્ ॥ ૧૬.૧૩॥

ભ્રાન્તાસ્તીર્થદૃશો ભિન્ના ભ્રાન્તેરેવ હિ ભિન્નતા ।
નિષ્પ્રતિદ્વન્દ્વિ વસ્ત્વેકં ભક્તાનાં ત્વં તુ રાજસે ॥ ૧૬.૧૪॥

માનાવમાનરાગાદિનિષ્પાકવિમલં મનઃ ।
યસ્યાસૌ ભક્તિમાંલ્લોકતુલ્યશીલઃ કથં ભવેત્ ॥ ૧૬.૧૫॥

રાગદ્વેષાન્ધકારોઽપિ યેષાં ભક્તિત્વિષા જિતઃ ।
તેષાં મહીયસામગ્રે કતમે જ્ઞાનશાલિનઃ ॥ ૧૬.૧૬॥

યસ્ય ભક્તિસુધાસ્નાનપાનાદિવિધિસાધનમ્ ।
તસ્ય પ્રારબ્ધમધ્યાન્તદશાસૂચ્ચૈઃ સુખાસિકા ॥ ૧૬.૧૭॥

કીર્ત્યશ્ચિન્તાપદં મૃગ્યઃ પૂજ્યો યેન ત્વમેવ તત્ ।
ભવદ્ભક્તિમતાં શ્લાઘ્યા લોકયાત્રા ભવન્મયી ॥ ૧૬.૧૮॥

મુક્તિસંજ્ઞા વિપક્વાયા ભક્તેરેવ ત્વયિ પ્રભો ।
તસ્યામાદ્યદશારૂઢા મુક્તકલ્પા વયં તતઃ ॥ ૧૬.૧૯॥

દુઃખાગમોઽપિ ભૂયાન્મે ત્વદ્ભક્તિભરિતાત્મનઃ ।
ત્વત્પરાચી વિભો મા ભૂદપિ સૌખ્યપરમ્પરા ॥ ૧૬.૨૦॥

ત્વં ભક્ત્યા પ્રીયસે ભક્તિઃ પ્રીતે ત્વયિ ચ નાથ યત્ ।
તદન્યોન્યાશ્રયં યુક્તં યથા વેત્થ ત્વમેવ તત્ ॥ ૧૬.૨૧॥

સાકારો વા નિરાકરો વાન્તર્વા બહિરેવ વા ।
ભક્તિમત્તાત્મનાં નાથ સર્વથાસિ સુધામયઃ ॥ ૧૬.૨૨॥

અસ્મિન્નેવ જગત્યન્તર્ભવદ્ભક્તિમતઃ પ્રતિ ।
હર્ષપ્રકાશનફલમન્યદેવ જગત્સ્થિતમ્ ॥ ૧૬.૨૩॥

ગુહ્યે ભક્તિઃ પરે ભક્તિર્ભક્તિર્વિશ્વમહેશ્વરે ।
ત્વયિ શમ્ભૌ શિવે દેવ ભક્તિર્નામ કિમપ્યહો ॥ ૧૬.૨૪॥

ભક્તિર્ભક્તિઃ પરે ભક્તિર્ભક્તિર્નામ સમુત્કટા ।
તારં વિરૌમિ યત્તીવ્રા ભક્તિર્મેઽસ્તુ પરં ત્વયિ ॥ ૧૬.૨૫॥

યતોઽસ્મિ સર્વશોભાનાં પ્રસવાવનિરીશ તત્ ।
ત્વયિ લગ્નમનર્ઘં સ્યાદ્રત્નં વા યદિ વા તૃણમ્ ॥ ૧૬.૨૬॥

આવેદકાદા ચ વેદ્યાદ્યેષાં સંવેદનાધ્વનિ ।
ભવતા ન વિયોગોઽસ્તિ તે જયન્તિ ભવજ્જુષઃ ॥ ૧૬.૨૭॥

સંસારસદસો બાહ્યે કૈશ્ચિત્ત્વં પરિરભ્યસે ।
સ્વામિન્ પરૈસ્તુ તત્રૈવ તામ્યદ્ભિસ્ત્યક્તયન્ત્રણૈઃ ॥ ૧૬.૨૮॥

પાનાશનપ્રસાધનસમ્ભુક્તસમસ્તવિશ્વયા શિવયા ।
પ્રલયોત્સવસરભસયા દૃઢમુપગૂઢં શિવં વન્દે ॥ ૧૬.૨૯॥

પરમેશ્વરતા જયત્યપૂર્વા તવ વિશ્વેશ યદીશિતવ્યશૂન્યા ।
અપરાપિ તથૈવ તે યયેદં જગદાભાતિ યથા તથા ન ભાતિ ॥ ૧૬.૩૦॥

## દિવ્યક્રીડાબહુમાનનામ સપ્તદશં સ્તોત્રમ્ ।

અહો કોઽપિ જયત્યેષ સ્વાદુઃ પૂજામહોત્સવઃ ।
યતોઽમૃતરસાસ્વાદમશ્રૂણ્યપિ દદત્યલમ્ ॥ ૧૭.૧॥

વ્યાપારાઃ સિદ્ધિદાઃ સર્વે યે ત્વત્પૂજાપુરઃસરાઃ ।
ભક્તાનાં ત્વન્મયાઃ સર્વે સ્વયં સિદ્ધય એવ તે ॥ ૧૭.૨॥

સર્વદા સર્વભાવેષુ યુગપત્સર્વરૂપિણમ્ ।
ત્વામર્ચયન્ત્યવિશ્રન્તં યે મમૈતેઽધિદેવતાઃ ॥ ૧૭.૩॥

ધ્યાનાયસતિરસ્કારસિદ્ધસ્ત્વત્સ્પર્શનોત્સવઃ ।
પૂજાવિધિરિતિ ખ્યાતો ભક્તાનાં સ સદાસ્તુ મે ॥ ૧૭.૪॥

ભક્તાનાં સમતાસારવિષુવત્સમયઃ સદા ।
ત્વદ્ભાવરસપીયૂષરસેન્નૈષાં સદાર્ચનમ્ ॥ ૧૭.૫॥

યસ્યાનારમ્ભપર્યન્તૌ ન ચ કાલક્રમઃ પ્રભો ।
પૂજાત્માસૌ ક્રિયા તસ્યાઃ કર્તારસ્ત્વજ્જુષઃ પરમ્ ॥ ૧૭.૬॥

બ્રહ્માદીનામપીશાસ્તે તે ચ સૌભાગ્યભાગિનઃ ।
યેષાં સ્વપ્નેઽપિ મોહેઽપિ સ્થિતસ્ત્વત્પૂજનોત્સવઃ ॥ ૧૭.૭॥

જપતાં જુહ્વતાં સ્નાતાં ધ્યાયતાં ન ચ કેવલમ્ ।
ભક્તાનાં ભવદભ્યર્ચામહો યાવદ્યદા તદા ॥ ૧૭.૮॥

ભવત્પૂજાસુધાસ્વાદસમ્ભોગસુખિનઃ સદા ।
ઇન્દ્રાદીનામથ બ્રહ્મમુખ્યાનામસ્તિ કઃ સમઃ ॥ ૧૭.૯ ॥

જગત્ક્ષોભૈકજનકે ભવત્પૂજામહોત્સવે ।
યત્પ્રાપ્યં પ્રાપ્યતે કિઞ્ચિદ્ભક્તા એવ વિદન્તિ તત્ ॥ ૧૭.૧૦ ॥

ત્વદ્ધામ્નિ ચિન્મયે સ્થિત્વા ષટ્ત્રિંશત્તત્ત્વકર્મભિઃ ।
કાયવાક્ચિત્તચેષ્ટાદ્યૈરર્ચયે ત્વાં સદા વિભો ॥ ૧૭.૧૧ ॥

ભવત્પૂજામયાસઙ્ગસમ્ભોગસુખિનો મમ ।
પ્રયાતુ કાલઃ સકલોઽપ્યનન્તોઽપીયદર્થયે ॥ ૧૭.૧૨ ॥

ભવત્પૂજામૃતરસાભોગલમ્પટતા વિભો ।
વિવર્ધતામનુદિનં સદા ચ ફલતાં મમ ॥ ૧૭.૧૩ ॥

જગદ્વિલયસઞ્જાતસુધૈકરસનિર્ભરે ।
ત્વદબ્ધૌ ત્વાં મહાત્માનમર્ચયન્નાસીય સર્વદા ॥ ૧૭.૧૪ ॥

અશેષવાસનાગ્રન્થિવિચ્છેદસરલં સદા ।
મનો નિવેદ્યતે ભક્તૈઃ સ્વાદુ પૂજાવિધૌ તવ ॥ ૧૭.૧૫ ॥

અધિષ્ઠાયૈવ વિષયાનિમાઃ કરણવૃત્તયઃ ।
ભક્તાનાં પ્રેષયન્તિ સ્વત્પૂજાર્થમમૃતાસવમ્ ॥ ૧૭.૧૬ ॥

ભક્તાનાં ભક્તિસંવેગમહોષ્મવિવશાત્મનામ્ ।
કોઽન્યો નિર્વાણહેતુઃ સ્યાત્ત્વત્પૂજામૃતમજ્જનાત્ ॥ ૧૭.૧૭ ॥

સતતં ત્વત્પદાભ્યર્ચાસુધાપાનમહોત્સવઃ ।
ત્વત્પ્રસાદૈકસમ્પ્રાપ્તિહેતુર્મે નાથ કલ્પતામ્ ॥ ૧૭.૧૮ ॥

અનુભૂયાસમીશાન પ્રતિકર્મ ક્ષણાત્ક્ષણમ્ ।
ભવત્પૂજામૃતાપાનમદાસ્વાદમહામુદમ્ ॥ ૧૭.૧૯ ॥

દૃષ્ટાર્થ એવ ભક્તાનાં ભવત્પૂજામહોદ્યમઃ ।
તદૈવ યદસમ્ભાવ્યં સુખમાસ્વાદયન્તિ તે ॥ ૧૭.૨૦ ॥

યાવન્ન લબ્ધસ્ત્વત્પૂજાસુધાસ્વાદમહોત્સવઃ ।
તાવન્નાસ્વાદિતો મન્યે લવોઽપિ સુખસમ્પદઃ ॥ ૧૭.૨૧ ॥

ભક્તાનાં વિષયન્વેષાભાસાયાસાદ્વિનૈવ સા ।
અયત્નસિદ્ધં ત્વદ્ધામસ્થિતિઃ પૂજાસુ જાયતે ॥ ૧૭.૨૨ ॥

ન પ્રાપ્યમસ્તિ ભક્તાનાં નાપ્યેષામસ્તિ દુર્લભમ્ ।
કેવલં વિચરન્ત્યેતે ભવત્પૂજામદોન્મદાઃ ॥ ૧૭.૨૩ ॥

અહો ભક્તિભરોદારચેતસાં વરદ ત્વયિ ।
સ્લાઘ્યઃ પૂજાવિધિઃ કોऽપિ યો ન યાચ્ઞાકલઙ્કિતઃ ॥ ૧૭.૨૪ ॥

કા ન શોભા ન કો હ્લાદઃ કા સમૃદ્ધિર્ન વાપરા ।
કો વા ન મોક્ષઃ કોऽપ્યેષ મહાદેવો યદર્ચ્યતે ॥ ૧૭.૨૫ ॥

અન્તરુલ્લસદચ્છાચ્છભક્તિપીયૂષપોષિતમ્ ।
ભવત્પૂજોપયોગાય શરીરમિદમસ્તુ મે ॥ ૧૭.૨૬ ॥

ત્વત્પાદપૂજાસમ્ભોગપરતન્ત્રઃ સદા વિભો ।
ભૂયાસં જગતામીશ એકઃ સ્વચ્છન્દચેષ્ટિતઃ ॥ ૧૭.૨૭ ॥

ત્વદ્ધ્યાનદર્શનસ્પર્શતૃષિ કેષામપિ પ્રભો ।
જાયતે શીતલસ્વાદુ ભવત્પૂજામહાસરઃ ॥ ૧૭.૨૮ ॥

યથા ત્વમેવ જગતઃ પૂજાસમ્ભોગભાજનમ્ ।
તથેશ ભક્તિમાનેવ પૂજાસમ્ભોગભાજનમ્ ॥ ૧૭.૨૯ ॥

કોऽપ્યસૌ જયતિ સ્વામિન્ ભવત્પૂજામહોત્સવઃ ।
ષટ્ત્રિંશતોऽપિ તત્ત્વાનાં ક્ષોભો યત્રોલ્લસત્યલમ્ ॥ ૧૭.૩૦ ॥

નમસ્તેભ્યો વિભો યેષાં ભક્તિપીયૂષવારિણા ।
પૂજ્યાન્યેવ ભવન્તિ ત્વત્પૂજોપકરણાન્યપિ ॥ ૧૭.૩૧ ॥

પૂજારમ્ભે વિભો ધ્યાત્વા મન્ત્રાધેયાં ત્વદાત્મતામ્ ।
સ્વાત્મન્યેવ પરે ભક્તા માન્તિ હર્ષેણ ન ક્વચિત્ ॥ ૧૭.૩૨ ॥

રાજ્યલાભાદિવોત્ફુલ્લૈઃ કૈશ્ચિત્પૂજામહોત્સવે ।
સુધાસવેન સકલા જગતી સંવિભજ્યતે ॥ ૧૭.૩૩ ॥

પૂજામૃતાપાનમયો યેષાં ભોગઃ પ્રતિક્ષણમ્ ।
કિં દેવા ઉત મુક્તાસ્તે કિં વા કેऽપ્યેવ તે જનાઃ ॥ ૧૭.૩૪ ॥

પૂજોપકરણીભૂતવિશ્વવેશેન ગૌરવમ્ ।
અહો કિમપિ ભક્તાનાં કિમપ્યેવ ચ લાઘવમ્ ॥ ૧૭.૩૫ ॥

પૂજામયાક્ષવિક્ષેપક્ષોભાદેવામૃતોદ્ગમઃ ।

ભક્તાનાં ક્ષીરજલધિક્ષોભાદિવ દિવૌકસામ્ ॥ ૧૭.૩૬॥

પૂજાં કે ચન મન્યન્તે ધેનું કામદુઘામિવ ।
સુધાધારાધિકરસાં ધયન્ત્યન્તર્મુખાઃ પરે ॥ ૧૭.૩૭॥

ભક્તાનામક્ષવિક્ષેપોઽપ્યેષ સંસારસમ્મતઃ ।
ઉપનીય કિમપ્યન્તઃ પુષ્ણાત્યર્ચામહોત્સવમ્ ॥ ૧૭.૩૮॥

ભક્તિક્ષોભવશાદીશ સ્વાત્મભૂતેઽર્ચનં ત્વયિ ।
ચિત્રં દૈન્યાય નો યાવદ્દીનતાયાઃ પરં ફલમ્ ॥ ૧૭.૩૯॥

ઉપચારપદં પૂજા કેષાં ચિત્ત્વત્પદાપ્તયે ।
ભક્તાનાં ભવદૈકાત્મ્યનિર્વૃત્તિપ્રસરસ્તુ સઃ ॥ ૧૭.૪૦॥

અપ્યસમ્બદ્ધરૂપાર્ચાભક્ત્યુન્માદનિરર્ગલૈઃ ।
વિતન્યમાના લભતે પ્રતિષ્ઠાં ત્વયિ કામપિ ॥ ૧૭.૪૧॥

સ્વાદુભક્તિરસાસ્વાદસ્તબ્ધીભૂતમનશ્ચ્યુતામ્ ।
શમ્ભો ત્વમેવ લલિતઃ પૂજાનાં કિલ ભાજનમ્ ॥ ૧૭.૪૨॥

પરિપૂર્ણાનિ શુદ્ધાનિ ભક્તિમન્તિ સ્થિરાણિ ચ ।
ભવત્પૂજાવિધૌ નાથ સાધનાનિ ભવન્તુ મે ॥ ૧૭.૪૩॥

અશેષપૂજાસત્કોશે ત્વત્પૂજાકર્મણિ પ્રભો ।
અહો કરણવૃન્દસ્ય કાપિ લક્ષ્મીર્વિજૃમ્ભતે ॥ ૧૭.૪૪॥

એષા પેશલિમા નાથ તવૈવ કિલ દૃશ્યતે ।
વિશ્વેશ્વરોઽપિ ભૃત્યૈર્યદર્ચ્યસે યશ્ચ લભ્યસે ॥ ૧૭.૪૫॥

સદામુર્ત્તાદમૂર્ત્તાદ્વા ભાવાદ્યદ્વાપ્યભાવતઃ ।
ઉત્થેયાન્મે પ્રશસ્તસ્ય ભવત્પૂજામહોત્સવઃ ॥ ૧૭.૪૬॥

કામક્રોધાભિમાનૈસ્ત્વામુપહરીકૃતૈઃ સદા ।
યેઽર્ચયન્તિ નમસ્તેભ્યસ્તેષાં તુષ્ટોઽસ્મિ તત્ત્વતઃ ॥ ૧૭.૪૭॥

જયત્યેષ ભવદ્ભક્તિભાજાં પૂજાવિધિઃ પરઃ ।
યસ્તૃણૈઃ ક્રિયમાણોઽપિ રત્નૈરેવોપકલ્પતે ॥ ૧૭.૪૮॥

## આવિષ્કારનામ અષ્ટાદશં સ્તોત્રમ્ ।

જગતોઽન્તરતો ભવન્તમાપ્ત્વા પુનરેતદ્ભવતોઽન્તરાલ્લભન્તે ।
જગદીશ તવૈવ ભક્તિભાજો ન હિ તેષામિહ દૂરતોઽસ્તિ કિઞ્ચિત્ ॥ ૧૮.૧॥

ક્વચિદેવ ભવાન્ ક્વચિદ્ભવાની સકલાર્થક્રમગર્ભિણી પ્રધાના ।
પરમાર્થપદે તુ નૈવ દેવ્યા ભવતો નાપિ જતત્ત્રયસ્ય ભેદઃ ॥ ૧૮.૨॥

નો જાનતે સુભગમપ્યવલેપવન્તો લોકાઃ પ્રયત્નસુભગા નિખિલ હિ ભાવાઃ ।
ચેતઃ પુનર્યદિદમુદ્ધતમપ્યવૈતિ નૈવાત્મરૂપમિહ હા તદહો હતોઽસ્મિ ॥ ૧૮.૩॥

ભવન્મયસ્વાત્મનિવાસલબ્ધસમ્પદ્ભરાભ્યર્ચિતયુષ્મદઙ્ઘ્રિઃ ।
ન ભોજનાચ્છાદનમપ્યજસ્રમપેક્ષતે યસ્તમહં નતોઽસ્મિ ॥ ૧૮.૪॥

સદા ભવદ્દેહનિવાસસ્વસ્થોઽપ્યન્તઃ પરં દહ્યત એષ લોકઃ ।
તવેચ્છયા તત્કુરુ મે યથાત્ર ત્વદર્ચનાનન્દમયો ભવેયમ્ ॥ ૧૮.૫॥

સ્વરસોદિતયુષ્મદઙ્ઘ્રિપદ્મદ્વયપૂજામૃતપાનસક્તચિત્તઃ ।
સકાર્થચયેષ્વહં ભવેયં સુખસંસ્પર્શનમાત્રલોકયાત્રઃ ॥ ૧૮.૬॥

સકલવ્યવહારગોચરે સ્ફુટમન્તઃ સ્ફુરતિ ત્વયિ પ્રભો ।
ઉપયાન્ત્યપયાન્તિ ચાનિશં મમ વસ્તૂનિ વિભાન્તુ સર્વદા ॥ ૧૮.૭॥

સતતમેવ તવૈવ પુરેઽથવાપ્યરહિતો વિચરેયમહં ત્વયા ।
ક્ષણલવોઽપ્યથ મા સ્મ ભવેત્સ મે ન વિજયે નનુ યત્ર ભવન્મયઃ ॥ ૧૮.૮॥

ભવદઙ્ગપરિસ્રવત્સુશીતામૃતપૂરૈર્ભરિતે સમન્તતોઽપિ ।
ભવદર્ચનસમ્પદેહ ભક્તાસ્તવ સંસારસરોઽન્તરે ચરન્તિ ॥ ૧૮.૯॥

મહામન્ત્રતરુચ્છાયાશીતલે ત્વન્મહાવને ।
નિજાત્મનિ સદા નાથ વસેયં તવ પૂજકઃ ॥ ૧૮.૧૦॥

પ્રતિવસ્તુ સમસ્તજીવતઃ પ્રતિભાસિ પ્રતિભામયો યથા ।
મમ નાથ તથા પુરઃ પ્રથાં વ્રજ નેત્રત્રયશૂલશોભિતઃ ॥ ૧૮.૧૧॥

અભિમાનચરૂપહારતો મમતાભક્તિભરેણ કલ્પિતાત્ ।
પરિતોષગતઃ કદા ભવાન્મમ સર્વત્ર ભવેદ્દૃશઃ પદમ્ ॥ ૧૮.૧૨॥

નિવસન્પરમામૃતાબ્ધિમધ્યે ભવદર્ચાવિધિમાત્રમગ્નચિત્તઃ ।
સકલં જનવૃત્તમાચરેયં રસયન્ સર્વત એવ કિઞ્ચનાપિ ॥ ૧૮.૧૩॥

ભવદીયમિહાસ્તુ વસ્તુ તત્ત્વં વિવરીતું ક ઇવાત્ર પાત્રમર્થે ।
ઇદમેવ હિ નામરૂપચેષ્ટાદ્યસમં તે હરતે હરોઽસિ યસ્માત્ ॥ ૧૮.૧૪॥

શાન્તયે ન સુખલિપ્સુતા મનાગ્ભક્તિસમ્ભૃતમદેષુ તૈઃ પ્રભોઃ ।
મોક્ષમાર્ગણફલાપિ નાર્થના સ્મર્યતે હૃદયહારિણઃ પુરઃ ॥ ૧૮.૧૫॥

જાગરેતરદશાથવા પરા યાપિ કાચન મનાગવસ્થિતેઃ ।
ભક્તિભાજનજનસ્ય સાખિલા ત્વત્સનાથમનસો મહોત્સવઃ ॥ ૧૮.૧૬॥

આમનોઽક્ષવલયસ્ય વૃત્તયઃ સર્વતઃ શિથિલવૃત્તયોઽપિ તાઃ ।
ત્વામવાપ્ય દૃઢદીર્ઘસંવિદો નાથ ભક્તિધનસોષ્મણાં કથમ્ ॥ ૧૮.૧૭॥

ન ચ વિભિન્નમસૃજ્યત કિઞ્ચિદસ્ત્યથ સુખેતરદત્ર ન નિર્મિતમ્ ।
અથ ચ દુઃખિ ચ ભેદિ ચ સર્વથાપ્યસમવિસ્મયધામ નમોઽસ્તુ તે ॥ ૧૮.૧૮॥

ખરનિષેધખદામૃતપૂરણોચ્છલિતધૌતવિકલ્પમલસ્ય મે ।
દલિતદુર્જયસંશયવૈરિણસ્ત્વદવલોકનમસ્તુ નિરન્તરમ્ ॥ ૧૮.૧૯॥

સ્ફુટમવિશ મામથાવિશેયં સતતં નાથ ભવન્તમસ્મિ યસ્માત્ ।
રભસેન વપુસ્તવૈવ સાક્ષાત્પરમાસત્તિગતઃ સમર્ચયેયમ્ ॥ ૧૮.૨૦॥

ત્વયિ ન સ્તુતિશક્તિરસ્તિ કસ્યાપ્યથવાસ્ત્યેવ યતોઽતિસુન્દરોઽસિ ।
સતતં પુનરર્થિતં મમૈતદ્યદવિશ્રાન્તિ વિલોકયેયમીશમ્ ॥ ૧૮.૨૧॥

## ઉદ્યોતનાભિધાનમેકોનવિંશં સ્તોત્રમ્ ।

પ્રાર્થનાભૂમિકાતીતવિચિત્રફલદાયકઃ ।
જયત્યપૂર્વવૃત્તાન્તઃ શિવઃ સત્કલ્પપાદપઃ ॥ ૧૯.૧॥

સર્વવસ્તુનિ ચ યૈકનિધાનાત્સ્વાત્મનસ્ત્વદખિલં કિલ લભ્યમ્ ।
અસ્ય મે પુનરસૌ નિજા આત્મા ન ત્વમેવ ઘટસે પરમાસ્તામ્ ॥ ૧૯.૨॥

જ્ઞાનકર્મમયચિદ્વપુરાત્મા સર્વથૈષ પરમેશ્વર એવ ।
સ્યાદ્વપુસ્તુ નિખિલેષુ પદાર્થેષ્વેષુ નામ ન ભવેત્કિમુતાન્યત્ ॥ ૧૯.૩॥

વિષમાર્તિમુષાનેન ફલેન ત્વદ્દૃગાત્મના ।
અભિલીય પથા નાથ મમાસ્તુ ત્વન્મયી ગતિઃ ॥ ૧૯.૪॥

ભવદમલચરણચિન્તારત્નલતાલઙ્કૃતા કદા સિદ્ધિઃ ।

સિદ્ધજનમાનસાનાં વિસ્મયજનની ઘટેત મમ ભવતઃ ॥ ૧૯.૫॥

કર્હિ નાથ વિમલં મુખબિમ્બં તાવકં સમવલોકયિતાસ્મિ ।
યત્સ્રવત્યમૃતપૂરમપૂર્વં યો નિમજ્જયતિ વિશ્વમશેષમ્ ॥ ૧૯.૬॥

ધ્યાતમાત્રમુદિતં તવ રૂપં કર્હિ નાથ પરમામૃતપૂરૈઃ ।
પૂરયેત્ત્વદવિભેદવિમોક્ષાખ્યાતિદૂરવિવરાણિ સદા મે ॥ ૧૯.૭॥

ત્વદીયાનુત્તરરસાસઙ્ગસન્ત્યક્તચાપલમ્ ।
નાદ્યાપિ મે મનો નાથ કર્હિ સ્યાદસ્તુ શીઘ્રતઃ ॥ ૧૯.૮॥

મા શુષ્કકટુકાન્યેવ પરં સર્વાણિ સર્વદા ।
તવોપહૃત્ય લબ્ધાનિ દ્વન્દ્વાન્યપ્યાપતન્તુ મે ॥ ૧૯.૯॥

નાથ સામ્મુખ્યમાયાન્તુ વિશુદ્ધાસ્તવ રશ્મયઃ ।
યાવત્કાયમનસ્તાપતમોભિઃ પરિલુપ્યતામ્ ॥ ૧૯.૧૦॥

દેવ પ્રસીદ યાવન્મે ત્વન્માર્ગપરિપન્થિકાઃ ।
પરમાર્થમુષો વશ્યા ભૂયાસુર્ગુણતસ્કરાઃ ॥ ૧૯.૧૧॥

ત્વદ્ભક્તિસુધાસારૈર્માનસમાપૂર્યતાં મમાશુ વિભો ।
યાવદિમા ઉહ્યન્તાં નિઃશેષાસારવાસનાઃ પ્લુત્વા ॥ ૧૯.૧૨॥

મોક્ષદશાયાં ભક્તિસ્ત્વયિ કુત ઇવ મર્ત્યધર્મિણોઽપિ ન સા ।
રાજતિ તતોઽનુરૂપામારોપય સિદ્ધિભૂમિકામજ મામ્ ॥ ૧૯.૧૩॥

સિદ્ધિલવલાભલુબ્ધં મામવલેપેન મા વિભો સંસ્થાઃ ।
ક્ષામસ્ત્વદ્ભક્તિમુખે પ્રોલ્લસદણિમાદિપક્ષતો મોક્ષઃ ॥ ૧૯.૧૪॥

દાસસ્ય મે પ્રસીદતુ ભગવાનેતાવદેવ નનુ યાચે ।
દાતા ત્રિભુવનનાથો યસ્ય ન તન્માદૃશાં દૃશો વિષયઃ ॥ ૧૯.૧૫॥

ત્વદ્વપુઃસ્મૃતિસુધારસપૂર્ણે માનસે તવ પદામ્બુજયુગ્મમ્ ।
મામકે વિકસદસ્તુ સદૈવ પ્રસ્રવન્મધુ કિમપ્યતિલોકમ્ ॥ ૧૯.૧૬॥

અસ્તિ મે પ્રભુરસૌ જનકોઽથ ત્ર્યમ્બકોઽથ જનની ચ ભવાની ।
ન દ્વિતીય ઇહ કોઽપિ મમાસ્તીત્યેવ નિર્વૃતતમો વિચરેયમ્ ॥ ૧૯.૧૭॥

## ચર્વણાભિધાનં વિંશં સ્તોત્રમ્ ।

નથં ત્રિભુવનનાથં ભૂતિસિતં ત્રિનયનં ત્રિશૂલધરમ્ ।
ઉપવીતીકૃતભોગિનમિન્દુકલાશેખરં વન્દે ॥ ૨૦.૧॥

નૌમિ નિજતનુવિનિસ્મરદંશુકપરિવેષધવલપરિધાનમ્ ।
વિલસત્કપાલમાલાકલ્પિતનૃત્તોત્સવાકલ્પમ્ ॥ ૨૦.૨॥

વન્દે તાન્ દૈવતં યેષાં હરશ્રેષ્ટા હરોચિતાઃ ।
હરૈકપ્રવણાઃ પ્રાણાઃ સદા સૌભાગ્યસદ્મનામ્ ॥ ૨૦.૩॥

ક્રીડિતં તવ મહેશ્વરતાયાઃ પૃષ્ઠતોઽન્યદિદમેવ યથૈતત્ ।
ઇષ્ટમાત્રઘટિતેષ્વવદાનેષ્વાત્મના પરમુપાયમુપૈમિ ॥ ૨૦.૪॥

ત્વદ્ધામ્નિ વિશ્વવન્દ્યેઽસ્મિન્નિયતિ ક્રીડને સતિ ।
તવ નાથ કિયાન્ ભૂયાન્નાનન્દરસસમ્ભવઃ ॥ ૨૦.૫॥

કથં સ સુભગો મા ભૂદ્યો ગૌર્યા વલ્લભો હરઃ ।
હરોઽપિ મા ભૂદથ કિં ગૌર્યાઃ પરમવલ્લભઃ ॥ ૨૦.૬॥

ધ્યાનામૃતમયં યસ્ય સ્વાત્મમૂલમનશ્વરમ્ ।
સંવિલ્લતાસ્તથારૂપાસ્તસ્ય કસ્યાપિ સત્તરોઃ ॥ ૨૦.૭॥

ભક્તિકણ્ડૂસમુલ્લાસાવસરે પરમેશ્વર ।
મહાનિકષપાષાણસ્થૂણા પૂજૈવ જાયતે ॥ ૨૦.૮॥

સદા સ્રિષ્ટવિનોદાય સદા સ્થિતિસુખાસિને ।
સદા ત્રિભુવનાહારતૃપ્તાય સ્વામિને નમઃ ॥ ૨૦.૯॥

ન ક્વાપિ ગત્વા હિત્વાપિ ન કિઞ્ચિદિદમેવ યે ।
ભવ્યં ત્વદ્ધામ પશ્યન્તિ ભવ્યાસ્તેભ્યો નમો નમઃ ॥ ૨૦.૧૦॥

ભક્તિલક્ષ્મીસમૃદ્ધાનાં કિમન્યદુપયાચિતમ્ ।
એતયા વા દરિદ્રાણાં કિમન્યદુપયાચિતમ્ ॥ ૨૦.૧૧॥

દુઃખાન્યપિ સુખાયન્તે વિષમપ્યમૃતાયતે ।
મોક્ષાયતે ચ સંસારો યત્ર માર્ગઃ સ શઙ્કરઃ ॥ ૨૦.૧૨॥

મૂલે મધ્યેઽવસાને ચ નાસ્તિ દુઃખં ભવજ્જુષામ્ ।
તથાપિ વયમીશાન સીદામઃ કથમુચ્યતામ્ ॥ ૨૦.૧૩॥

જ્ઞાનયોગાદિનાન્યેષામપ્યપેક્ષિતુમર્હતિ ।
પ્રકાશઃ સ્વૈરિણામિવ ભવાન્ ભક્તિમતાં પ્રભો ॥ ૨૦.૧૪॥

ભક્તાનાં નાર્તયો નાપ્યસ્ત્યાધ્યાનં સ્વાત્મનસ્તવ ।
તથાપ્યસ્તિ શિવેત્યેતત્કિમપ્યેષાં બહિર્મુખે ॥ ૨૦.૧૫॥

સર્વાભાસાવભાસો યો વિમર્શવલિતોઽખિલમ્ ।
અહમેતદિતિ સ્તૌમિ તાં ક્રિયાશક્તિમીશ તે ॥ ૨૦.૧૬॥

વર્તન્તે જન્તવોઽશેષા અપિ બ્રહ્મેન્દ્રવિષ્ણવઃ ।
ગ્રસમાનાસ્તતો વન્દે દેવ વિશ્વં ભવન્મયમ્ ॥ ૨૦.૧૭॥

સતો વિનાશસમ્બન્ધાન્મત્પરં નિખિલં મૃષા ।
એવમેવોદ્યતે નાથ ત્વયા સંહારલીલયા ॥ ૨૦.૧૮॥

ધ્યાતમાત્મુપતિષ્ઠત એવ ત્વદ્વપુર્વરદ ભક્તિધનાનામ્ ।
અપ્યચિન્ત્યમખિલાદ્ભુતચિન્તાકર્તૃતાં પ્રતિ ચ તે વિજયન્તે ॥ ૨૦.૧૯॥

તાવકભક્તિરસાસવસેકાદિવ સુખિતમર્મમણ્ડલસ્ફુરિતૈઃ ।
નૃત્યતિ વીરજનો નિશિ વેતાલકુલૈઃ કૃતોત્સાહઃ ॥ ૨૦.૨૦॥

આરબ્ધા ભવદભિનુતિરમુના યેનાઙ્ગકેન મમ શમ્ભો ।
તેનાપર્યન્તમિમં કાલં દૃઢમખિલમેવ ભવિષીષ્ટ ॥ ૨૦.૨૧॥

ઇતિ ઉત્પલદેવવિરચિતા શિવસ્તોત્રાવલિઃ સમ્પૂર્ણા ।

Encoded and proofread by Somadeva Vasudeva

*Utpaladevavirachita Shivastotravali*

pdf was typeset on February 14, 2024

Please send corrections to *sanskrit@cheerful.com*